
आषाढमासः
वर्षम् – ६९
नवमोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ जुलाई २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ५ |
| ६ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ६ |
| ७ | पीडाघातकगुलिकाः | डॉ. हर्षदेवमाधवः | ७ |
| ८ | अपराजेया | डॉ. भूपेन्द्र कुमार राठौरः | ८ |
| ९ | शिवाजीतिहासविषये तथ्योद्घाटनम् | देवर्षिकलानाथशास्त्री | १३ |
| १० | व्याकरणस्य उपयोगिता | महेशचन्द्रमीना | १७ |
| ११ | श्रीजीमहाराजानां कृतिषु भक्तितत्त्वम् | अनिरूद्ध दाधीच | १९ |
| १२ | श्रीअजमल-भक्ति-गाथा (काव्यम्) | आचार्य पं. नथमलशास्त्री दाधीचः | २० |
| १३ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २२ |
| १४ | प्राणदायकाः पादपाः | पं. रमेशचन्द्र शर्मा | २४ |
| १५ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २६ |
| १७ | आद्यशंकराचार्यस्य आत्मबोधग्रन्थे | युगल किशोर भारद्वाजः | २६ |
| १८ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २७ |
| १९ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २० | कोविद-श्रीकलानाथशास्त्री जयतु | डॉ. नारायण काङ्करः | ३२ |
| २१ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |
| २२ | संस्कृत समाचाराः | प्रधानसम्पादक | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

राजीव दाधीच
व्यवस्थापक

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाले यस्य विराजते शशिकला मौलौ च भागीरथी,
लोकानामघनाशिनी भगवती कल्लोलिनी राजते।
अङ्के यस्य नगाधिराजतनया कण्ठे च तीव्रं विषम्,
व्याघ्रस्याजिनधारिणं पशुपतिं वन्दामहे सादरम्।

## मासावतरणम्

आषाढे यदि कर्षकाः न धरणीं सिञ्चन्ति वृष्टिं विना
बीजं नैव वपन्ति चेज् जनतया जीविष्यते वा न वा
जीव्यन्ते नहि जीवनेन रहिता लोकाः पृथिव्यां शुभाः,
तस्माद् वारिधनं सदा सुरपतिं वन्दामहे वारिदम्।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

आषाढमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
जुलाई, 2019
अङ्कः -9
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# अस्माकं जीवने इंटरनेटस्य दुष्प्रभावः

...✍ पं. प्यारेमोहनशर्मा

सर्वे जनाः स्वनिजतां सुरक्षितां वाञ्छन्ति। सर्वे स्वेनैव प्रकारेण जिजीविषन्ति। न कोऽपि तेषां जीवने हस्तक्षेपं कुर्यात्। व्यक्तिः वाञ्छति यदनावश्यकरूपेण कोऽपि तस्य निजजीवने हस्तक्षेपं न कुर्यात्। परन्तु किं वस्तुतः सम्प्रति अस्माकं निजता सुरक्षिता विद्यते ? किं इंटरनेटसंसारे वयं वस्तुतः सुरक्षिताः स्म? विगतदिनेषु एतादृशी नैका घटनाः घटिता याः विचारयितुं विवशान् कुर्वन्ति।

संप्रति एवं निर्वाचनं कारयितुं गृहात् बहिः गच्छन्ती एका सामान्या सर्वकारीयकर्मचारी महिला इंटरनेट द्वारा प्रचारमुपगता यतोहि सुन्दरी आकर्षिका चासीत्। कश्चन तस्याश्चित्रं इंटरनेटेन प्रचारितवान्। यद्यपि सा महिला कर्मचारी केवलं स्वकीयमुत्तरदायित्वं पालयतिस्म। परन्तु इंटरनेट द्वारा यथा सा प्रसिद्धिमुपगता सा कष्टप्रदा अवर्तिष्ट। नैतत् तस्यै अरोचत। परन्तु सा दार्ढ्येन तस्या अवहेला- मकरोत्। परन्तु न तादृशी दृढता सर्वासु महिलासु भवति। एकमुदाहरणं वर्तते। कोलकातायां एका साधारणबालिका आईपीएल स्पर्धां द्रष्टुं क्रीडाप्राङ्गणे उपस्थिताऽभवत्। तत्र दर्शकेभ्यः क्रीडाप्रदर्शकं यन्त्रं (केमरा) सहसा तदीयमुखसम्मुखे समागतम्।इत्थं तस्याः (विडियो वायरल) चित्रं सर्वत्र प्रसृतं जातम्। दीपिकाघोष नाम्नी सा बालिका अवदत् मदीयचित्रं प्रसृतं जातम् इत्यनेन न तु नाहं कष्टमन्वभवम्, परन्तु तदा लक्षशो युवका इंटरनेट द्वारा मदीयं चित्रमन्विष्य (ट्रोल) माँ व्यथितामकार्षुः। ते अश्लीलां टिप्पणीमकार्षुः अशिष्टां भाषामवदन्।

एतादृशी घटना प्रत्यहं इंटरनेटद्वारा भवति। आकर्षकं सुन्दरं महिलामुखं षोडशीमुखं विशेषरूपेण प्रत्यहं इन्टरनेट द्वारा मीडियाद्वारा च प्रदर्श्यते। ततश्च छात्राः पुरुषाः तथान्ये तया सहअश्लीलां वार्तां कुर्वन्ति। नियमव्यवस्थातिदुर्बला, इंटरनेट संसारे हस्तक्षेपस्य दुर्बला व्यवस्था महिलानां जीवनं कठिनं व्यधात्।

एषा स्थितिः केवलं महिलानामेव न अपितु बालिका, वृद्धा, बालका अपि अनेन व्यथिताः सन्ति। इंटरनेट संसारः अन्धकारमयो वर्तते अत्र कः कदा अस्मासु प्रविश्य भवते आपदमुपस्थितां कुर्यात्? न च भवान् ज्ञास्यत्यपि। नैकान्युदाहरणानि दृष्टिपथे समागतानि। वीडियो द्वारा नैके अपरिचिता रात्रौ, सुन्दरं महिलाचित्रं दृष्ट्वा ताभिः वार्तायाः प्रयासं कुर्वन्ति। यदि महिला अज्ञानवशात् वारमेकमपि वार्तां करोति तथा अश्लीलवार्ताक्रमो न समाप्तिं गच्छति।

महिलानां प्रति समाजस्य दृष्टिकोणं विशेषतः पुरुषाणां दृष्टिकोणं एतादृक् नकारात्मकं विद्यते यत् सुन्दरं मुखं दृष्ट्वा तेषां लारः पतति। अत्रेदं चिन्तनीयं यदेको युवकः स्वगृहे माता-भगिनी-मातामही-पितामही प्रभृतीनां पूर्णरूपेण सुरक्षां विदधाति स एव बहिरागत्य किमिति अन्य महिलाः प्रति तथाचरणं न विदधाति।

दिल्लीनगरस्य ध्रुवहत्याकाण्डमतीव बीभत्सं दृश्यमुप-स्थापयति। एकः पिता स्वकीयतरुणीतनयया सह मार्गे गच्छति। मार्गे दुष्टाः केचन युवकाः युवत्या अभद्रमाचरन्ति, पिता विरोधं करोति तदा जनसम्मर्दे

वणिक्पथि ते तां घ्नन्ति। सैषा दुश्चेष्टा मार्गादारभ्य भवतः कार्यस्थलं यावत् प्रसृता जाता। गृहे वसन्तो बालकाः बालिका अपि सुरक्षिता न सन्ति। यतो हि न जाने कस्मिन् वेशे कस्मिन् समये का व्यक्ति दुष्टविचारैः दुष्टनियत्या बालकानां मृगयां कुर्यात्।

तीव्रगत्या तकनीकिविकासः समधिकं वर्धमानो वर्तते। भवतां दूरभाषसंख्या लघुतमापि च अस्माकं सर्वविधपरिचयेन सर्वमपि सार्वजनिकं करोति। अद्य अस्माकं स्थितिः अभिमन्यु सदृशी जाता यः चक्रव्यूहे प्रविष्टस्तु भवति परन्तु निःसरणं न जानाति। सहस्रशो विचाराः नैकविधाः कटाक्षाः आभासी संसारान्निस्सर्या-स्माकं मस्तिष्के प्रविष्टा भवन्ति। अस्मिन् तकनीकसंसारे यदि भवन्तः शान्त्या जिजीविषन्ति तर्हि इंटरनेटस्य सावधानतया प्रयोगं कुर्वन्तु। अनावश्यकं कस्यापि जीवने हस्तेक्षपं न कुर्वन्तु तथा कृते न कोऽप्यस्माकं जीवने हस्तक्षेपं विधास्यति।

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**अभ्यर्थयामि हे जिह्वे वक्तव्यं मधुरं वचः।।**
**हितं गुणाकरं सारं पापाढ्मं त्यज दुःखदम्।।**

– हे जिह्वे ! मैं प्रार्थना करता हूँ, तुझे मधुर, हितकारी, गुणों की खान, सार पूर्ण वचन बोलना चाहिये। पाप से पूर्ण दुःखदायक वचनों को त्याग दे।

**तौ हस्तौ सफलौ स्यातामर्थयन्तौ जिनं गुरुम्।**
**कुदेवाचरितौ व्यर्थौ तथा हिंसाप्रवर्तकौ।।**

– वे हाथ सफल हैं, जो जिन देव और गुरु की पूजा करते हैं। जो हिंसा की प्रवृत्ति वाले कुदेवों की पूजा करते हें वे हाथ व्यर्थ हैं।

**जिनेन्द्रे च गुरौ शास्त्रे नतं वै यस्य मस्तकम्।**
**तस्यैव सफलं मन्ये अन्यत्र नमनं व्यथा।।**

– जिसका मस्तक जिनेन्द्र देव, गुरु और शास्त्र को नत (नम्रीभूत) होता है, मैं इसी के मस्तक को सफल मानता हूँ, अन्यत्र नमन व्यर्थ है।

**वीतरागे मुनौ शास्त्रे गच्छतश्चरणौ हि यौ।**
**यात्रादिकमहातीर्थे सफलौ तौ न चापरौ।।**

– वीतराग देव, मुनि, शास्त्र तथा यात्रादि महातीर्थ को गमन करने वाले चरण ही सफल हैं, अन्य नहीं।

**हृदयं तदहं मन्ये यद्विवेकश्रुतान्वितम्।**
**तत्परं जिनधर्मे च परं पापप्रदं भवेत्।।**

– मैं उस हृदय को मानता हूँ, जो विवेक और श्रुत से मुक्त है। जिन (आत्म) धर्म में तत्पर है। अन्य हृदय पाप (दुःख) को देने वाला है।

**मन्ये देहं तदेवाहं यच्चारित्रतपः क्षमम्।**
**परीषहसहं धीरं मतं पापकरं परम्।।**

– मैं उस शरीर को शरीर मानता हूँ जो चारित्र और तप में समर्थ है। परीषह (आपातित) बाधाओं को सहने में धीर है, अन्य शरीर व्यर्थ हैं।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# विनायकसहस्र सिद्धे

( गताङ्कादग्रे )

❑ पं. राजेन्द्रमोहनशर्मा

विनायकः शनैश्चक्षुरुद्घाटनाय प्रायतत परन्तु साफल्यं नालभत। यतोहि शहद घृतयोः प्रभावेण तदीय-भ्रूपक्ष्मणी (भोंहपलक) दृढं सम्पृक्तावभूताम्। नायकः स्मित्वा विनायकस्येमां क्रियामपश्यत्। अन्ते नदीनां शुद्धजलेन विनायकमस्नापयत्। स्नापनानन्तरं विनायकाय पीतवस्त्राणि-उपहृतानि। येषु लताभ्यः पत्रेभ्यः वृक्षस्य त्वचाभ्यो विभिन्नान्यलङ्करणानि रचितान्यासन्। जनानां समूहसम्मुखे वस्त्रपरिवर्तनं विनायकः कर्तुं न शक्नोतिस्म। अतः स तानि पीतवस्त्राणि स्कन्धे संस्थाप्य दक्षिणतो वामभागे वामतो दक्षिणभागे समारोपयत्। वस्त्रधारणानन्तरं आर्द्रकीचकस्यैकभागे विनिर्मिते विभिन्नवृक्षाणां लघुपादपानां पत्राणां च मनोहरछवियुक्तं मुकुटसदृशं समुन्नतशिखरयुक्तगोलचन्द्रं विनायक-शिरसि समायोजयत्। कीचकस्य दुर्बलाभिः रेखाभिः पीतरङ्गस्य त्रिपुण्ड्रं विनायकस्य भाले समायोजयत्। रक्तचन्दनेन पीतचन्दनेन च विनायकस्य भुजासु चित्राणि चित्रितानि। तदनन्तरं क्रमशः चमेलीमोगराजपासदा-बहारकचनारकेसरकमलमन्दारवैजयन्तीजूहीचम्पा-मालती कनेरशाल्यकेतकीगेंदाप्रभृतिपुष्पैः निर्मितानि द्वाराणि विनायकः पर्यधापयत्। पादयोः विभिन्नपुष्पाणां परागकणाः प्रसारिताः तथा वनेषूपलब्धसामग्रीद्वारा विनिर्मितकङ्कण (कड़े) मजीराभूषणानि परिधापितानि। ततः अभिवादनं चक्रुः तदनन्तरं नायको विनायकं न्यवेदयत् भवन्तः समुत्थाय आदिमानवसमूहं स्वस्नेहेन पूरयन्तु। मूषकः सर्वमिदमपश्यत्। स अस्यामतिथि-सेवायां किञ्चित् न्यूनतामन्वभूत्। स प्रस्तरेण शुष्ककीचकं प्रस्तेरण अताडयत्। द्वित्रिबारं तथाकरणेन कीचकः प्राज्वलत्। ज्वलन्तं कीचकमादिनायकं प्रायच्छत् क्रमशः हस्तं गृहीत्वा पौनः पुन्येन विनायकसम्मुखे अभ्रामयत्। अनेन सहैव आदिमानवसमूहस्य स्त्रियः पुरुषाश्च दौलषावरीता-बजीवातजली अलगोजारापरा ताशा बांसुरीपीयूबीन वीणासारंगी गजवीनातम्बूरानंदीशहनाई डमरूधन झांज प्रभृति यन्त्राणि उच्चैरवादयन्। मूषकस्यानया क्रियया विनायकः अतीवक्रुद्धोऽभवत्। तस्याक्षीणि रक्तान्यभूवन्। परन्तु मूषकस्तु स्वयं नेत्रे निमील्य नायकेन शराग्निशिखापरिभ्रमणस्यानन्दे निमज्जित आसीत्। यथा यथा त्वरितगत्याग्निशिखाभ्रमत् तथा तथा आदिमानवसमूहो विभिन्नाभिः मुखध्वनि-भिर्वाद्ययन्त्रध्वनिभिः सह तीव्रगतिध्वनिषु संयुक्तः संजातः। जना अनृत्यन् यावन्न ते पूर्णरूपेण श्रान्ता अभूवन् तावदग्निशिखापरिभ्रमणमतिथिअभिवादनं च प्राचलत्।

सूर्यः संप्रति अस्ताचलं जिगमिषुरभवत्। सूर्यस्य सप्ताश्वाः विनाकस्यास्याद्भुतसत्कारस्य साक्षिणोऽभूवन् विनायकः स्वयं अग्निशिखाशीर्ष्णि स्थितः मूषकं दण्डयितुं युक्तिमचिन्तयत्।

एकप्रहरस्य वक्राकाराग्निपरिभ्रमणानन्तरं वाद्यनृत्या-नामद्भुतसत्कारक्रियायाः समाप्त्यनन्तरमादिनायकः साग्रहमतिथिं न्यवेदयत् भवद्भ्यः समानीतानीमानि फलानि भोज्यसामग्रीं च गृह्णन्तु इति। विनायको निषेद्धुमैच्छत् परन्तु नायकः समुपस्थितो जनसमूहश्च न किमप्यशृणोत् अन्ते तस्मिन्नेव शिलाखण्डे समुपविश्य विनायको तैरानीतां खाद्यसामग्रीं स्वीचकार। विनायकस्य क्रोधः शनैः शनैः शान्तः संजातः। अद्य प्रथमबारं विनायकः काननेष्वत्यधिकस्वादिष्टानि फलानि

सानन्दमभक्षयत्। इतः पूर्वं न कदापि एतादृशानि स्वादिष्टानि फलानि तेन भक्षितानि। अस्मिन्नेवातिथ्यक्रम एका आदिवासीस्त्री रसभरितं हरितं तुम्बफलं प्रास्तौत् सा तत् परिपक्कं मत्वा आनयत्। विनायको विनम्रतया तयाऽऽनीतं तुम्बफलं स्वीचकार। परन्तु यदा तत् फलं त्रोटयित्वा द्वित्रीणि खण्डानि मुखेऽनयत् तदा विनायकस्य मुखं कषायं संजातम्। न स स्वकीयानने भावविशेषं प्राचीकटत्। विनायकस्ततक्षणमेव मूषकमिङ्गितेन स्वसमीपं समाहूय तस्मै तत् फलं दत्वावदत्-इदं तूम्बफलं स्वादिष्टं भवतां स्वास्थ्यायानुकूलं भविष्यति। विशिष्टरूपेण नेत्रं संचालयत् उवाच यत् नेदमुच्छिष्टं त्याज्यं पूर्णमेव भक्षणीयम्।

मूषकोऽतीव प्रसन्नोऽभवत्। चिरकालात् भोजनं प्रतीक्षतेस्म। अद्य प्रथमवारं विनायकेन सह मित्रताया गर्वमन्वभवत्। विनायकः सार्वजनिकरूपेण तस्मै प्रतिष्ठां प्रायच्छत् यत्तुम्बफलं तस्मै उपाहरत् सा स्त्री तत् मूषकाय प्रददौ। यथैव मूषको दन्तैस्तदत्रोटयत् शीशीति शब्द-मकरोत्। तत् फलमतीव कषायं तिक्तं चासीत्। मूषकस्य स्थितिः दर्शनीयाभवत्। न स तत् फलं थूत्कर्तुं शक्नोति न च निगीर्णितुं शक्नोतिस्म। विनायकः मूषकमपश्यत्। परिहासं कुर्वन्नवदत् भो मित्र। अतिथिभिः कृतस्या-तिथ्यस्य हृदा कृतज्ञता ज्ञापनीया। भवते इदमतीव स्वादिष्टं सुखदं च फलं दत्तम् उच्छिष्टं न त्याज्यम्। मूषकस्थितिः अवर्णऽनीयाऽभवत्।

विनायकस्तदीया गणाश्चादिनायकस्याग्रहेण भोज्य-सामग्रीं सत्कारं च स्वीचक्रुः। एकैकशः स्वादिष्टानि फलानि तेऽभक्षयन्। परन्तु मूषको वञ्चित एवाभवत्। मूषकस्याननस्य भावभङ्गिमां दृष्ट्वा तत्रोपस्थिताः स्त्रियः पुरुषाश्चाट्टहासं चक्रुः। शिशवश्च चीत्कारं च अकार्षुः। विनायकश्च मन्दस्मितेनोत्साहमवर्धयन्। फलसमाप्त्य-नन्तरमादिनायको मूषकमन्यखाद्य-पदार्थानेतुन् माग्रहं चकार। प्रथमं तु मूषको नाग्रेऽसरत्। परन्तु लक्षस्येङ्गितेन शनैः शनैः स्वादिष्टव्यञ्जनानामानन्दमन्वभूत्।

**( प्राचार्य )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

---

**लघुकाव्यपृषताः**

# पीडाघातकगुलिकाः ( Pain Killer )

**❑ डॉ. हर्षदेवमाधवः**

यथा
पीडाघातकगुलिकाः
पीडां न नाशयन्ति
किन्तु
विस्मारयन्ति पीडां
काललवं यावत्,
पुनरपि पीडा
तथैव तिष्ठति-
प्रतीक्षमाणा पीडाघातकगुलिका-प्रभाव-नाशार्थम्।
तथैव
संसारसुखानि
विस्मारयन्ति
संसारपीडां शाश्वतीं
काललवं यावत्।

**8, राजतिलक बंगलोज**
**आबादनगरसमीपे, बोपल, अमदावादम्-380058**

लघुनाटकम्

# अपराजेया

❑ डॉ. भूपेन्द्र कुमार राठौरः

**कथावस्तु**

चतुर्दृश्यात्मकस्य नाटकस्य कथावस्तु कन्या-भ्रूणहत्या-सम्बन्धितं वर्तते। परं सा हत्या जागरूकतायाः कारणात् न भवति। सा बालिका प्रशासनिकाधिकारी भवति, तदा अपराधबोधप्रायश्चित्तं भवति। शकुन्तलायाः जन्मदातारौ पितरौ दमयन्ती रमेशश्च पालिता माता विनिता भवति। ऋचा-विनोदस्य च महती भूमिकास्मिन् नाटकेऽस्ति।

**शिक्षां प्राप्नोति -**

कन्याभ्रूणहत्यां कदापि न कुर्यात्। इदं कुकृत्यं अपराधश्च चास्ति। कन्या दुर्गास्वरूपा भवति। पात्राणि:-

विनोदः - रमेशस्य पिता
आरती - विनोदस्य पत्नी
रमेशः - ऋचायाः पिता
ऋचा - रमेशस्य पुत्री
दमयन्ती - रमेशस्य पत्नी
डॉ. अमीतः - सरकारी सेवायां नियुक्तः चिकित्सकः
डॉ. सपना - महिला चिकित्सिका
विश्वेन्द्रसिंहः - थानेदारः
निरुपमा - महिला पुलिसकर्मी
प्रीतिराय - होस्टलवार्डनपदकार्यरता महिला
विनिता - शकुन्तलायाः अध्यापिका
शकुन्तला - प्रशासनिक सेवानियुक्ताधिकारी

## प्रथमं दृश्यम्

(रमेशः राजकीयमहाविद्यालये प्राध्यापकपदे कार्यरतः अस्ति। रमेशस्य भार्यापि विद्यालयेऽध्यापिका अस्ति। सा संस्कृतविषयं पाठयति। दमयन्ती दयारहितास्ति तस्याः व्यवहारः विद्यालयेऽपि बालकान् प्रति निदर्यतापूर्ण आसीत्। तस्याः श्वश्रूः (आरती) अतीव क्रूरा नृशंसा च अस्ति। दमन्यत्याः एका पुत्री आसीत्, सा ऋचा अस्ति। चिकित्सकस्यानुसारेण अपरगर्भे पुत्र्याः लक्षणं प्राप्नोति, तदा कः घटनाक्रमः भवति, तस्य वर्णनमित्थम्......।)

आरती - पौत्रमुखं द्रष्टुमिच्छामि, परं दुर्भाग्यमस्ति मम पुत्रवधोः पुत्री अस्ति। अपराऽपि पुत्री भविष्यति। रमेशः कथयति यद् दमयन्त्याः गर्भे चिकित्सकस्यानुसारेण पुत्रीलक्षणं प्रप्नोति।

विनोदः - भाग्यवान् ! पुत्री देवस्वरूपा भवति। तस्याः आगमनं सौभाग्यवर्धकं भविष्यति। मम कामनास्ति सा दुर्गा-स्वरूपा स्यात्।

आरती - भवान् एतस्मिन्विषये न जानाति यत् पुत्री परकीयं धनमस्ति। अभिज्ञानशाकुन्तलेऽपि महर्षि कण्वः कथयति अर्थो हि कन्या परकीय एव।

विनोदः - महर्षि कण्वस्याभिप्रायः पुत्र्या विषये अयं नास्ति। सः शकुन्तलायाः पालनं-पोषणं करोति, तस्यै शिक्षां-दीक्षां प्रददाति। तस्याः विवाहं करोति। तस्मिन्काले पुत्र्याः सम्बन्धितं तस्य कथनं कर्तव्यबोधं प्रति संकेतं करोति। तदा कथयति-जातो ममायं विशदः प्रकामं। प्रत्यर्पितन्यास इवान्तरात्मा।

(पुन: विनोदे वदति-अद्यापि दम्पत्यो दांयित्वमस्ति। सन्तानसम्बन्धित निर्वाहं कर्तव्यपूर्णं भवतु।)

आरती – भवान् न जानाति पुत्रेणैव वंशवृद्धिः भवति।

विनोदः – आम्। जानामि। पुत्र-पुत्र्योर्विषये भवत्या धारणानुचि तास्ति। पुत्र:-पुत्री परमात्मनः प्रसाद स्वरूपं भवति। तौ ईश्वरस्यानुग्रहरूपे स्वीकरणीयौ।

आरती – त्वं मूढमति:, त्वया सह वार्ताया: कोऽपि लाभो न। अहं वाच्छामि गर्भपात: भवतु, बालिका सन्तति: उचिता नास्ति। अहं रमेश: -दमयन्ती वा गर्भपातस्य विषये कथयिष्याम:।

विनोदः – यदि तौ तव वचन पालनं न करिष्यत:। तदा किं ............

आरती – दमयन्ती अवश्यमेव करिष्यति।

विनोदः – कथम्।

आरती – दमयन्त्या: सखी विमला अस्ति। सा निजीचिकित्सालये कार्यरतास्ति। तया सह दमयन्त्या: चलवाणी माध्यमेन वार्ता अभवत्। तदा मयापि वार्ताया: वाक्यानि श्रुतानि।

विनोदः – किं-किं वाक्यं अशृणो:?

आरती – डॉ. अमीत:.... डॉ. सपना .... गर्भपात:... उचितमस्ति।

विनोदः – अहं प्रतिकारं करिष्यामि। कन्यावध: पापपूर्णं कृत्यमस्ति। ब्रह्महत्याया अपि वर्धित: अपराध: अस्ति।

आरती – भवान् देवालये गच्छ। तत्रैव स्वज्ञानं प्रदर्शयतु।

(विनोद: तत् स्थानं त्यक्त्वा उद्यानं प्रति चलति। परं तस्य मनसि एतस्मिन् विषये कर्तव्याकर्तव्यस्य सन्दर्भे मानसिकी चर्चा भवति। विनोद: लक्ष्यं करोति उचित-समये आगतेऽहमवश्यमेव प्रतिकारं करिष्यामि।)

## द्वितीयं दृश्यम्

(गोधूलिवेलायां दमयन्ती पूर्वदिवसवदेव यदा विद्यालयात् आगच्छति तदा आरती दमयन्त्या सह चायं पिबन्ती स्वमतं तस्या: सम्मुखं प्रकटं करोति। दमयन्ती कथयति एषा विचारणा ममापि अस्ति, परं चिन्ता अस्ति। तयोर्मध्ये को वार्तालाप: भवति। अस्मिन् दृश्ये वर्णितमस्ति।)

आरती – अद्य मम मनसि चिन्ता अस्ति।

दमयन्ती – का चिन्ता ?

आरती – भवती चायंग्रहणं करोतु तत्पश्चाद् अहं कथयिष्यामि, यतोहि त्वम् अतीव म्लाना असि।

दमयन्ती –कथयतु। अहं स्वस्थास्मि।

आरती – रमेश: कथयति, पुत्री भविष्यति।

दमयन्ती – आम्। एतस्मिन् विषये चिन्तास्ति ममापि परं किं कुर्याम्।

आरती – गर्भपात: स्यात्। अस्मिन् कार्ये का चिन्ता, बहव: चिकित्सका: इदं कार्यं तूष्णीरूपेण कुर्वन्ति।

दमयन्ती – विगतशनिवासरे विमला (या मम सखी) सा अपि कथयति यत् भवती डॉ. सपनया सह परामर्शं करोतु। डॉ. अमीत: नगरीय चिकित्सालये चिकित्सक: अस्ति। सपनाया: माध्यमेन स: विश्वासयुक्त: भूत्वा गर्भपातं करोति। अत: भवत्या इदं कार्यं पूर्णं

करणीयम्। सपनायाः चलवाणी अङ्का..... अहं ददामि।

दमयन्ती – डॉ. सपना वदति?

डॉ. सपना – आम्। सपनास्मि।

दमयन्ती – अहं मिलितुं वाञ्छामि, यतोहि समस्याऽस्ति।

डॉ. सपना – आगच्छतु, आगच्छतु।

(तदा ऋचापि विद्यालयात् आगच्छति।)

दमयन्ती – भोजनं कृत्वा शयनं करोतु। वयं चिकित्सालये गमिष्यामः।

ऋचा – किं कारणम्?

आरती – पुत्री विश्रामं करोतु।

ऋचा – न।

सा (स्वमनसि) विचारं करोति काऽपि वार्ता अस्ति। अहमपि गमिष्यामि।

आरती – पुत्रि ......?

ऋचा – गमिष्यामि ....., गमिष्यामि।

दमयन्ती – पुत्रि, तत्र किं करिष्यामि।

ऋचा – मा, अवश्यमेवाहं करिष्यामि।

रमेशः – उचितमस्ति, चिकित्सालयात् आगते सति आपणमपि गमिष्यामः। अतः तत्रैव पश्यामः। ऋचायाः पुस्तकानि न सन्ति, ऋचया सह पुस्तकेषु भ्रान्तिः न भविष्यति।

(आरती-दमयन्ती-ऋचा-रमेशः च गच्छन्ति) ऋचा पश्यति अत्र चिकित्सालयः नास्ति। डॉ. सपनायाः गृहमस्ति। किं कारणं स्यात्?)

डॉ. सपना – नमस्कार। आगच्छतु-आगच्छतु।

दमयन्ती – नमो नमः।

डॉ. सपना – उपविशतु ! उपविशतु ! का वार्ता अस्ति ?

दमयन्ती – गर्भपातस्य विषये।

डॉ. सपना – किं बालिकायाः भ्रूणमस्ति।

दमयन्ती – आम्।

ऋचा – (मनसि) बत ! हत्या भविष्यति। ओह ! कष्टमस्ति। माता-कुमाता अस्ति, परं वेदवाणी अस्ति-माता कुमाता न भवति। किं मिथ्यास्ति इयं वाणी? न, मृषा न स्यात्। अहं प्रतिकारं करिष्यामि।

डॉ. सपना – पञ्चाशत्सहस्त्राणि भविष्यन्ति। यतोहि 'अल्ट्रासाउण्ड' इति माध्यमेन इदं कार्यं स्यात्। डॉ. अमीतः नगरस्य प्रसिद्धः सरकारी सेवायां नियुक्तः चिकित्सकः अस्ति। इदं कार्यं स एव करिष्यति, अहमपि तत्र त्वां मिलामि।

दमयन्ती – (दर्पयुक्ता भूत्वा) अहमपि अध्यापिका अस्मि। मम पतिः महाविद्यालये प्राध्यापकः अस्ति। अतः शुल्कस्य विषये चिन्ता नास्ति।

डॉ. सपना – रविवासरे डॉ. अमीतमहोदयस्य गृहे शुल्केन सह आगच्छतु। भवत्याः कार्यं पूर्णं भविष्यति।

दमयन्ती – आम्।

डॉ. सपना – काऽपि वार्ता न, पुनरागच्छ।

ऋचा – पापा (जनकः) आपणं न गमिष्यामि। मम शिरोवेदना अस्ति। अतः गृहं चलतु।

रमेशः – आम् पुत्रि, उचितमेव स्यात् यत् वयं गृहं प्रति गच्छेम। पुस्तकमानयित्वा अहं आगमिष्यामि।

(विनोदः उद्यानात् आगत्या विचारं करोति यत् गृहे कोऽपि न परं सहसा सर्वे आगच्छन्ति।

ऋचा – प्रवेशं कृत्वा, चरणस्पर्शं कुर्वती अकस्मात् सा रुदति।

विनोदः – पुत्रि किम् कारणमस्ति ?

ऋचा – चिन्तास्ति, पितामह।

विनोदः – कस्मात् कारणात् चिन्तास्ति ?

ऋचा – अद्य पितामही-माता-पिता अहं च डॉ. सपनायाः गृहे गताः। तदा मया ज्ञातं यत् मातुरपरा पुत्री स्यात् अतः ते गर्भपातं कारयिष्यन्ति रविवासरे। डॉ. अमीतः इदं कृत्यं करिष्यति।

विनोदः – धैर्यधारणं कुरु, पुत्रि। अहमपि कन्यावधं नेच्छामि। प्रतिकारः अवश्यमेव भविष्यति।

## तृतीयं दृश्यम्

(इदं दृश्यं चिकित्सालयस्यास्ति। ते गर्भपातस्य हेतोः चिकित्सालये गच्छन्ति। परं विनोदस्य सूचनातः पुलिसः तत्रैवागच्छति। गर्भपातः न भवति, अधुना कारागृहं भविष्यति। एतस्मिन् विषयेऽधोलिखितं वर्णनम्।)

डॉ. सपना – आगच्छन्तु। शुल्कं गृहीत्वा डॉ. अमीतं प्रति गच्छति। दमयन्त्याः गर्भे पुत्रीलक्षणमस्ति। अतः गर्भपातं कारयितुं सा इच्छति।

डॉ. अमीत – उचितमस्ति। अहं करोमि, शीघ्रमेव स्यात्। संशययुक्तः विषयो नास्ति।

विनोदः – थानेदारसाहब। नमस्कारः।

विश्वेन्द्रसिंह – नमस्कारः, कथयतु।

विनोदः – अद्य डॉ. अमीतमहोदयस्य गृहे गर्भपातः इति कुकृत्यं भविष्यति। यतोहि मम पुत्रवधू-ममभार्या-ममपुत्र श्च घृणितकार्यं कर्तुमुद्यताः सन्ति। पुत्रवधू दमयन्ती आसन्नप्रसवास्ति। डॉ. अमीतस्यानुसारेण तस्याः गर्भे पुत्र्याः लक्षणमस्ति।

विश्वेन्द्रसिंहः– धन्यवादः महोदय। अहम् शीघ्रं कार्यवाहीं करोमि।

निरूपमा – किम् अभवत् श्रीमन्।

विश्वेन्द्रसिंहः– विनोदस्य सन्देशः वर्तते। अतः डॉ. अमीतस्य गृहे गन्तुं शीघ्रं कुरु। अहमपि गमिष्यामि।

निरूपमा – अतिशीघ्रम्।

**(तौ गच्छतः)**

विश्वेन्द्रसिंहः– डॉ. त्वं न जानासि किं कन्याभ्रूणहत्या कानूनी-अपराधः वर्तते। दमयन्ती इत्यादयः कुत्र सन्ति। यूयं सर्वे अपराधं कर्तुं तत्पराः स्थ। पुलिसथाने प्राथमिकी दर्ज-अस्ति। अतः मया सह चलन्तु। निरूपमा ग्रहणं कुरु-डॉ. सपना, दमयन्ती आरती इत्यादीन् जनान्। (शीघ्रं कानूनी कार्यवाहीं पूर्णां कृत्वा न्यायालये ते गच्छन्ति)

(तत्र न्यायाधीशमहोदयः निर्णयं प्रददाति, अयम् अपराधः अक्षम्योऽस्ति। अतः दशवर्षपर्यन्तं सजां कारागृहस्यार्थदण्डेन सह सर्वेभ्यः प्रददामि। न्यायपालिकायाः आदेशः यत् दमयन्त्या गर्भे या सन्ततिः स्यात्। तस्याम् अधिकारः सर्वकारस्य स्यात्। सर्वकारः एव पालनं-पोषणं-शिक्षा-दीक्षा इत्यादि कार्यं करिष्यति। ऋचा विनोदयो जागरूकतया गर्भपातः न भवति। परं कारागृहः भवति।)

## चतुर्थं दृश्यम्

(किञ्चित् कालपश्चात् दमयन्त्याः प्रसवपीडा भवति। चिकित्सालये तस्याः पुत्री जन्मालभत। तस्या नामकरणं शकुन्तला-अभवत्। न्यायालयस्या-देशानुसारेण द्विवर्षपश्चात् (शकुन्तलां) राजस्थान-सर्वकारः ग्रहीष्यति। तस्याः पालनं-पोषणम् इत्यादयः सर्वकारस्य विद्याश्रमे भवन्ति। प्रीतिराय वार्डनपदे कार्यं करोति। तस्मिन् आश्रमे विनीता अध्यापिका पदे नियुक्तास्ति।)

विनीता - दुर्भाग्यम् अस्ति।

प्रीतिराय - जनाः अपराधं कुर्वन्तो लज्जां न प्राप्नुवन्ति। किं भविष्यति, हे राम!

विनीता - विनाशः भविष्यति।

प्रीतिराय - (शकुन्तलां प्रति) पुत्रि आगच्छ। दुग्ध ग्रहणं करोतु। (किञ्चित्कालपर्यन्तं बालिका किशोरावस्थां प्राप्नोति)

विनीता - शकुन्तला मेधाविनी छात्रा अस्ति निश्चित-मस्ति प्रशासनिक सेवायां गमिष्यति।

प्रीतिराय - अहम् अतीव प्रसन्नोऽस्मि।

(शकुन्लता स्नातक-स्नातकोत्तर-परीक्षां प्रथम श्रेण्याम् उत्तीर्णां करोति। सा स्वर्णपदकं प्राप्नोति। तत्पश्चात् भारतीय प्रशासनिक सेवायां गन्तुं तत्परा भवति। सा कठिन परिश्रमं करोति। शकुन्तलायाः चयनं भारतीय प्रशासनिक सेवायां प्रथम प्रयास एवाभवत्। श्रीकृष्णस्य-कथनमत्र सार्थकम्-कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।)

सौभाग्येन शकुन्तला तस्मिन् जनपदे जिलाधीशपदे नियुक्ताभवत्। तस्या जन्मदाता माता-पिता दशवर्ष पश्चात् कारागृहात् आगच्छन्ति। अद्य समाचारपत्रे शकुन्तलायाः चित्रेण सह तस्याः जीवनवृत्तान्तं प्रकाशितम् अभवत्। तं पठित्वा अद्य दमयन्ती-रमेश-आरती-इत्यादयः अपराधबोधप्रायश्चित्तं कुर्वन्ति। विनोदस्य नेत्राभ्याम् अविरलाश्रुधारा प्रवहति। परं विनोदः गर्वयुक्तः भूत्वा कथयति- पश्य! पश्य! पुत्री दुर्गारूपास्ति, परकीयं धनं नास्ति। ऋचा अतीव प्रसन्नाऽस्ति, यतोहि तस्याः भगिनी जिलाधीशस्य पदे अधुना कार्यं करिष्यति। तस्याः योगदानं पूर्णमभवत्। अतः सा अपराजेया अस्ति।

**आदित्य-**

**कुंज 2 K 12 महावीर नगर विस्तार योजना**

**कोटा ( राज. )**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम – भारती**

**खाता संख्या – 2139101912502**

**IFS Code - CNRB0002139**

# शिवाजीतिहासविषये तथ्योद्घाटनम्

❑ देवर्षिकलानाथशास्त्री

मोगलकालीनः परमराष्ट्रभक्तो हिन्दू-पदपात-साहादिविविधिविरुदविभूषितो महाराष्ट्रवीरः शिवाजी-राजस्तत्कालीनेन सम्राजा औरंगजेबेन आमेर-महाराज-मिर्जाराजा जयसिंह द्वारा सन्धिप्रस्तावं सम्प्रेष्य स्वकीयायां राजसभायां मन्त्रणार्थमागरानगरमाकारितः किन्तु राजसभायां न्यक्कारपूर्वकं राजपुरुषाणां पङ्क्तौ स्थापितः एतदुपरि वैलक्ष्यमाक्रोशं च व्यञ्जयन्नयं तद्राजकुमारेण शंभाजीत्याख्येन सह निगृहीतः (अवरुद्धो वा) दृष्टिबन्धकत्वेन तत्रैव विट्ठलदास हवेलीत्याख्ये स्थले (कारागारवत्तदवरोधाय निर्धारिते) कतिपयं समयं निग्रहेऽतिष्ठत् किन्तु विविधानि कौशलानि व्यापारयन्नयं स्वसुतेन सह वेषपरिवर्तनादि विधाय फलकरण्डिकादिषु स्वात्मानं गोपयित्वा निग्रहाद् बहिर्निरगात् अश्वारोहणं च कृत्वा स्वनगरं प्रापेति कथा सुविदिताऽस्ति भारतेतिहासे। तादृश्यः कथा बालपाठ्येषु पुस्तकेष्वपि मुद्रिता अभूवन्नतः सर्वैः पठिता एव स्युः।

एतदुपरि बहूनां विचारकाणां विस्मयः स्वाभाविक एव यत् कथं विश्वसनीयेयं कथा? कथारूपेण त्वेतादृशी प्रेरणास्पदं घटना हृदयावर्जिकाऽस्त्येव किन्त्वैतिहासिक-तथ्यानि यदि विमृश्येरंस्तर्हि कथमिदं संभवति यन्मोगलसम्राजा निगृहीतं सुविशालं पौरुषमयं समर्थं वीरद्वयं फलकरण्डिकानिलीनं भूत्वा कारातो निर्गच्छेत् न कश्चनाऽपि तत् तौ च प्रेक्षेत, शतशः क्रोशान् निर्गच्छन्तं कमपि बन्दिनं मोगलसाम्राज्यगुप्तचरा वा आरक्षिणो वा महाराष्ट्रपर्यन्तं गवेषयितुं निग्रहीतुं वाऽपि न पारयेयुः? एतदुपरि गवेषयकैर्यानि तथ्यानि प्राप्तानि, सत्यापितानि च तेषां प्रमाणनं तत्कालीनैरैतिहासिक-संस्कृतकाव्यैरपि क्रियते, तत्कालीनैः, पत्रैः कर्मचारिणां प्रेक्षकाणां च दैनन्दिनीभिरपि क्रियते। पुरालेखविभागेषु तादृश्यो दैनन्दिन्यभः समुपलब्धाः सन्ति।

आम्बेरराज्यस्य मन्त्री (दीवान इत्याख्यः) परकालदासस्तदानीं सञ्जायमानानां घटनानामभिलेखनाय नियुक्तोऽभूत्। स च स्वकीयान् सन्देशहरान् वार्ताहरांश्च आगराप्रभृतिनगरेष्वपि संस्थाप्य वृत्तानि सङ्कलयति स्मेति सुविदितं राजस्थानेतिहासज्ञानाम्। आगरायां गेगराजः बल्लूशाह इत्यादयः स्थिताः परकालदासाय सूचनाः प्रहिण्वन्ति स्म। परकालदासस्य दैनन्दिनी प्रकाशमा-याताऽस्ति केन्द्रीयाभिलेखागारतः। अन्यान्यपि पत्राणि समुपलब्धानि समस्तामपि तामिमां घटनां स्पष्टीकुर्वन्ति। तासां यथायथं प्रत्यक्षरं सत्यापनं तदनन्तरं प्रायोऽर्धशताब्दीपश्चाल्लिखिते कविकलानिधिश्रीकृष्ण-भट्टविरचिते प्रामाणिके जयपुरेतिहासविवेचके ईश्वर-विलास महाकाव्ये प्रत्यक्षीकर्तुं शक्यते। अत्र हि मिर्जाराजा जयसिंहेन शिवाजीराजो मोगलसम्राजः औरङ्गजेबस्य राजसभायामानीतः कुटिलमतिना तेन कारागृहे निगृहीतः किन्तु जयसिंहेन स्वप्रभावा-न्निष्कासितो मोचितोऽ-भूदिति प्रथमसर्गीये त्रयस्त्रिंशे पद्ये स्पष्टीभवति-आबद्धाञ्जलि-राजगाम सहसा यस्य प्रतापाग्निना/संभीतः शिवराजनाम-विदितो वीरः स दुर्गेश्वरः। दिल्लीशेन च मेलितः कृतरुषस्तस्यैव कारागृहे/रुद्धोप्येष दुरुद्धरे निजबलाद् भूयो विनिष्कासितः। शिवजीराजसदृशः प्रतापी वीरः कस्यचनान्यस्यस्य प्रतापेन भीतः स्यादिति कथं सम्भवति? अतः पद्यमिदं पठित्वा मादृशाः बहवो विप्रकृताः स्युरिति नैसर्गिकमेव। निश्चितमिदमत्युक्तिपूर्णं भवेदेव, स्वनायकप्रशंसापरं वर्णनं वा भवेत्, किन्तु

जयसिंहस्य प्रयासै शिवराजो विमोचितः स्यादित्यस्य सत्यतायां कः स्यात् सन्देहः?

इतिहासज्ञानामपीयं स्थापना यत्तदानीं मिर्जाराजा जयसिंहस्तु सूबेदार पदारूढोऽन्यत्र सुदूरं भारतेऽभूत् किन्तु तेन स्वसुतो रामसिंहः स्पष्टं निर्दिष्टोऽभूद् यत् शिवाजीराजो मया स्ववचनं दत्त्वा भवतां सुरक्षा मदीयं दायित्वं स्या दित्याश्वास्य च कुटिलमतेरौरं-गजेबस्यानुरोधवशादागरानगरमानायितोऽभूत्, त्वं (राजकुमारो रामसिंहः) च तत्सुरक्षायै नियुक्तो ऽभूः, अतः इदमास्माकीनं कर्तव्यं यत् शिवाजी-शम्भाजी सुरक्षितौ महाराष्ट्रं प्रति प्रेष्येताम्। कारागारे च (वीठलदास हवेलीत्याख्ये दृष्टिबन्धकस्थापनाय निर्धारिते प्रासादे) रामकृष्णो ब्राह्मणः, जीवा जोशी, श्रीकृष्ण उपाध्यायः, पुरोहित बलराम इत्यादयो मिर्जाराजा जयसिंहस्यैव प्रतिनिधयः आरक्षिणोऽभूवन्-रामसिंहस्य च नियंत्रणाधीनमभूत् तद् दलम्। बहिस्तु सम्राजो भुशुण्डीधारिणः, तस्माद् बहिः मीणाजातीया रक्षकाः, तस्माद् बहिश्च सम्राजः प्रतिनिधेः फौलादखां इत्यस्य सुरक्षा प्रबन्धोऽभूत्।

एवंविधं सुदृढं प्रबन्धं छित्त्वा कश्चन बन्दी कथं पलायेत? कथं च पलायनायाश्वादिवाहान् प्राप्नुयात्। केवलं रक्षिणां सहमत्या, गजनिमीलिकया, स्वैच्छिकयो-पेक्षया चैवेदं संभवति। अश्वादीनां व्यवस्था तु कस्यचन साहाय्येनैव सम्भवति तदेव सञ्जातम्। अतो रामसिंह एतत्कृते उत्तरदायीति सम्राजा विदितमभूत्। स च विविधैः प्रकारैरेतदुपरि सम्राजः कोपभाजनमभूत्। तस्य राजसभाप्रवेशो न्यषेधि, तस्य संमानो न्यूनीकृतो निरस्तो वा, तस्य वधायाऽपि निभृतप्रयासा अक्रियन्तेति प्रसिद्धमितिहासे। बहवस्तु कथयन्ति यच्छार्दूलस्य पञ्जरेऽपि स प्रवेशितोऽभूत् किन्तु जीवन्नेव बहिरागन्तुं क्षमोऽभवदित्यादि। इदं च ईश्वरविलासस्य पद्येनानेनापि सत्याप्यते-

**काले प्रालेयहेमाचलयुगलमपि प्रस्खलेत् सागरोऽपि**
**क्षोभेण त्यक्तवेलो भवति न तु चलेद्रामसिंहोतिधीरः।**
**सेवाशम्भावसम्भावितततमयवनाधीशकाराविमोकौ**
**सद्यो निर्मोच्य भूयस्तरमुपरिभरं स्वात्मनः सोऽयमूहे ।।**

**( 1/40 )**

अपरं च सर्वमिदं वृत्तं तत्कालीनदैनन्दिनीभिः परकालदासीयपत्रैश्चापि स्पष्टीभवति। इतिहासग्रन्थेष्वपि स्पष्टीकृतमिदं, पत्रकारैरपि। मया प्राक् 18 जुलाई 1971 रविवासरे दिल्लीतः प्रकाशिते नवभारतटाइम्स दैनिकस्य रविभारताख्ये परिशिष्टे घनश्यामलालमाथुरेण लिखितं रोचकं विस्तृतं शोधपत्रं प्रेक्ष्य परकालदासीय दैनन्दिनवृत्तानां, पुरालेखीयाया अन्यस्याः सामग्रयाश्च विषये पृष्टा इतिहासविद्वांसोऽब्रुवन् यत् सम्प्रति स्पष्टमिदं यन्मोगलसम्राजः प्रातिनिध्यं कुर्वाणेन मिर्जाराजा-जयसिंहेन विविधैरनुरोधैरसकृत् प्रत्यायितोऽभून्महाराष्ट्र-रत्नभूतः शिवाजिराजो यदौरंगजेबेन सह वार्तां कृत्वा यदि कश्चन सन्धिः क्रियते तर्हि द्वयोरपि पक्षयोः कृते हितावहं स्यात्। एतत्कृते आगरायात्रायां कृतायां न किञ्चिदप्य-पक्षीयेत यतो हि औरङ्गजेबेन प्रत्यायितोऽभूज्जयसिंहो यत् शिवाजिराजस्य न किञ्चिदहितं चिकीर्षितम्। तदनु शिवाजिना स्वीकृतोऽयं प्रस्तावः। रामसिंहस्याश्वारोहिभिः सादरमानायितः शिवाजिराजः किन्तु विश्वासघातं विधाय निगृहीत औरंगजेबेन। तत्तु सुविदितमेव सर्वस्मिन् भारते।

1723 वैक्रमाब्दे ज्येष्ठमासे (मई सन् 1666) विलिखिते परकालदासीये दैनन्दिनवृत्ते स्पष्टमस्ति यत् शिवाजी, शंभाजी च दृष्टिनिग्रहेऽभूतां किन्तु न खलु बन्दिवन्निगृहीतौ, बहिर्गमनागमने भ्रमणे वाऽसमर्थौ अभूताम्। तौ क्रयविक्रयादि, संवादप्रेषणादि च कुरुतः स्म। इदं तु स्मरणीयं यत् सम्राजोऽन्तःपुरे, परिकरे, सभासु

चानेके शिवाजिनं प्रति सद्भावं, श्रद्धां, सम्मानं च बिभ्रतिस्म। भारतीयाः क्षत्रिया राजानश्च बहिर्मोगल-साम्राज्याधीनता-वैवश्यवशान्मौनमास्थिता अपि शिवाजिनो राष्ट्रभक्तिं, धर्मपरायणतां च विदन्ति स्म, तत्कृते निभृतं श्रद्धामपि दधति स्म। इतो जयसिंह-रामसिंहादयो वाञ्छन्ति स्म यच्छीघ्रमेव शिवाजिराजो विमोच्येत। अतो रामसिंहस्य योजनया 1666 ई. वर्षस्यागस्तमासे सुनिभृतं विरचितैः कृत्रिमपारपत्रैरथवा अन्येन केनापि विधिना द्वावपि शिवाजी-शम्भाजी वीरौ वेषं परिवर्त्य वीठलदासहवेलीतो निष्कासितौ, तत्र च रामसिंहप्रबन्धने पूर्वमेव स्थापितानश्वानारोह्य, अन्यै राजकीयाश्वारोहिभिः सह आगरातो बहिर्नीतौ, तावदवधि च कोऽपि न ताननुसरेत् अन्वेषयेद् वा यावदवधि तौ स्वप्रदेशं न प्राप्नुत इति प्रबन्धोऽपि सावधानं कल्पितः।

भूयांसं समयं तु सम्राड् ज्ञातुमपि नाऽपारयद् यत् शिवाजीराजो विनिर्गत इति। यदा स तदिदमजानात् तदा कथं क्रोधान्धोऽभूदित्यस्य वर्णनं भाद्रपदमासे (3 सितंबर 1666 ई.) गेगराजेन परकालदासं प्रति लिखिते पत्रे स्पष्टीभवति यत्प्रादेशिकभाषायां विलिखितमस्ति। ''पातसाहजी सेवो भागता कोण-कोण से अतराज हुआ और किण भात सेवो भागो और कुण की चौकी से भागो सो चार घड़ी दिन चढ्याँ भाग्या की खबर हुई सगला हजार आदम्यां की चौकी से भागो सो वो दिन तो कुछ भी न जाण्यो कोण बगत भाग्यो।'' सम्राजा कोपाविलेन यदा स्पष्टीकरणार्थं प्रहरिण आज्ञप्तास्तदा तैरिदमेव स्पष्टीकरणं स्वरक्षार्थं प्रदत्तं यत् तदा बहूनि कराण्डकानि नीयमानान्यासन्, तेष्वेव निलीय गतो भवेदिति। गेगराजस्य पत्रे वर्णिता सेयमेव वार्ता गतशताब्दीषु प्रसृतस्यास्य प्रवादस्य कथानकस्य च मूलमस्ति यत्फलकरण्डकेषु निलीय शिवाजिराजो निरगात्। तस्येमे शब्दा अवधार्याः''तेठाँ पाछे मनसूबो कर या ठाह रही छै भागवा की जो पटारियाँ री आमदरफत थी सो पटारियाँ में बैठ निकलग्यो।'' एतत् स्पष्टीकरणमादाय (यदारक्षिभि-स्तदा स्वप्रतिरक्षायै मृषैव परिकल्प्य प्रस्तुतं स्यात्) तादृश्यः कथा अद्यावधि प्रसारमापुः।

पत्रमिदं शिवाजिराजस्य निर्गमनात्, सप्तदश-दिनानन्तरं व्यलेख्यत। एतत् पूर्वं विलिखितेषु गुप्तसूचना-पत्रेष्विदमपि सूचितमस्ति यत् सम्राजा शिवाजिराजस्य निभतं घातनायापि प्रयतितमभूत्। इदं विदित्वैव रामसिंहो मुहम्मदाख्यस्य सामन्तस्य सविधे गत्वा स्पष्टमसूचयद् यन्ममाश्वासनेन पणेन च शिवाजी समागतोऽस्ति, यदि तस्य घातनं चिकीर्ष्यते तर्हि पूर्वमहं घातनीयः। रामसिंहस्यायं स्पष्टाग्रहः स्फुटं सूचितोऽस्त्येषु शब्देषु ''श्रीमहाराज कुंवरजी मुहम्मद अमीखाँ (अलीखाँ?) के डेरे चढी गया रद बदल की अमीखाँ ने कयो जु पातसाहजी सेवोने मारबा को विचार करो छे सो यो तो कौल ऊपर अठै आयौ छ सो पातसाहजी पहलै म्हारै ताईं मारौ। म्हारा बेटा ने बुलायवाने मारौ। म्हारा मार्‌या पाछै ईनै मारो। भावे सो करो।'' पत्रमिदं परकालदासेन ज्येष्ठकृष्णाष्टम्यां (16 मई 1666) लिखितं सर्वं स्पष्टीकुरुते। 18 जुलाई दिवसे लिखितेन वृत्तपत्रेण स्पष्टीभवति यत् शिवाजीराजस्तत्र निगृहीतोऽपि क्रयादिकं कुरुते स्म। इमावर्दी खाँ इत्याख्यात् हस्तिपकान्तेन पञ्चदशसहस्समुद्रामूल्येन गजाः क्रीता अभूवन्। य एवं-विधानि कार्याणि मासावधौ तत्र स्थितः कुरुते स्म स फलकरण्डिकास्वात्मानं संगोप्य निर्गन्तुं बाध्यः स्यादिति कथं विश्वसनीयम्?

वस्तुतस्तु सम्राजं सूचयितुमारक्षिभिः प्रहरिभि-श्चात्मरक्षायै सेयं कथा, कल्पिताऽभूद् यत्स बन्दी करण्डिकासु निलीनः स्यादतो गतः प्रासादात् कोऽत्रास्माकं दोष इत्यादि पूर्वमुक्तमेव। परकाल-दासदैनन्दिनी-वृत्तपत्रादिषु तादृशोऽपि प्रसङ्गोऽस्ति यद् बहुकालं यावत् स्थितः शिवाजी सम्राजाऽनुरुद्धो यत्स

तान् दुर्गान् प्रत्यर्पयेद् ये तेन मोगलवाहिनीं प्रधर्ष्य विजिताः किन्तु वीरवरेण शिवाजिना तदिदं ब्रुवता प्रत्याख्यातं यन्नाधुना ते दुर्गा मदधीनाः। कथमहं तान् प्रत्यर्पयेयम् इत्यादि। 7 जून 1666 दि. पत्रेणेदमपि प्रतीयते यद् दुर्ग प्रत्यर्पणं प्रत्याचक्षमाणस्य शिवाजिन उपरि क्रुद्धेन सम्राजा शिवाजिराजस्य वध आज्ञापितः। तदिदं श्रुत्वा साम्राज्ञी (बेगम) विलक्षाऽभूत्। तया प्रतिबोधितः सम्राड्यच्छिवाजिनः अत्र निग्रहणं केवलं मिर्जा राजा जयासिंहस्य बलेन, कौशलेन, प्रत्याश्वासनेन च समभूत्। भवता जयसिंहाय तदिदमाश्वासनमपि प्रादायि यत् शिवाजिनः किमप्यहितं नैव करिष्यामि। तथापि स निगृहीतः यदि सम्प्रति भवता अपरोऽपि विश्वासघातः क्रियते तर्हि भवदाश्वासनोपरि कः सामन्तो विश्वासं करिष्यति? पत्रस्यास्येमे शब्दाः स्पष्टीकुर्वन्ति सर्वम् ''बेगम बड़ी पातसाहजी सूँ अरज करी जो मीर्जाराजा तुम्हारा बडा ही बन्दा है। हजरत को तायो न चाहिए। हजरत ई सो मारो मारोगे तो आगे से हजरत का कौल पर कोई भी लोंगा नहीं।''

इत्थं जून मासतो जुलाई मासं यावद् विविधा घटना अघटन्त। तदनन्तरं सुचिन्तितयोजनानुसारं राजकुमार-रामसिंहस्य प्रयासैः शिवाजीराजस्य शम्भाजिकुमारस्य न निर्गमनं, तदनन्तरमश्ववाहकैः स्वप्रदेशप्रापणं च सम्भाव्यतामानायितमिति दर्पणवत् स्फुटीभवन्ति सर्वा घटनाः। तदनन्तरं रामसिंहः कुटिलमतेरवरंगजेबस्य कोपभाजनमभूदिति सर्वैरितिहासज्ञैः स्पष्टीकृतमस्ति। अतः शिवाजिनिर्गमने रामसिंहस्य साहाय्यं तु निर्विवाद-मस्त्येव। यदि शिवाजिराजः केवलं स्वप्रयत्नैः फलकरण्डिकासु निभृतनिलीनो निरगमिष्यत्तर्हि रामसिंहोऽकारणं किमिति कोपभाजनमभविष्यत्? शिवाजीराजा, शम्भाजी कुमारश्च मिर्जाराजा जयसिंह-स्यानुरोधवशात् तदाश्वासननोपर्येव च आगरानगरं समायातौ। इति हिन्दुराज समाजे सर्वत्र प्रसिद्धिरभू-त्सञ्जाता। तयोर्निग्रहणेन सर्वेष्वपि राजपुत्रेषु, राजगृहेषु, हिन्दूधर्मस्नेहिषु प्रजाजनेषु च तादृश्या भावनाया जागरणं स्वाभाविकमेवाभूद् यदयं सम्राट् शत्रुदलनकामना-यास्तावान् वशगोऽस्ति यत्कुटिलमतिरयं स्वामिभक्त-सामन्तानां वचनान्याश्वासनानि चाप्यनादृत्य तैः सह विश्वासघातमाचरति। कः खल्वेतस्य धर्मान्धस्य, प्रतिशोधान्धस्य चानुगततां स्वीकुर्यात्। अत एव शनैः शनैः सर्वेऽपि सामन्ता मोगलसाम्राज्यस्यानीत्या खेदिता निर्विण्णाश्च भूत्वा निभृतं तत्समर्थनं परिहृत्य स्वातन्त्र्याप्तये प्रयासरता अभूवन्। सवाई जयसिंहस्य समये तु हिन्दूराजवंशानां संघटनस्यैक्यस्य च प्रयासाः स्पष्टत एव प्रारब्धा अपि तदनु यथासमयं मोगलसाम्राज्यविनिपातः कथमभूत्, कथं च गौराङ्गानां वैदेशिकानामाधिपत्यं प्रारभतेति सर्वं त्वितिहासाध्येतारः स्पष्टं विदन्त्येव।

अनेन विवरणेन त्विदमेव प्रतुष्टूषितं यत्समाजे सुप्रथिता शिवाजीराजस्य मोगलकारातो निर्गमनस्य कथा सर्वथा प्रेरिका, अवितथा च वर्तते एव किन्तु तत्पृष्ठतः कथं घटनाचक्रं प्रावर्तत, प्रामाणिकैरभिलेखैस्तस्य सूक्ष्मं विवरणं केन रूपेण कुत्र द्रष्टुं शक्यम्, नूतनतयोपलब्धा-नामभिलेखानां सूक्ष्मेक्षिकया तदानीन्तनी वस्तुस्थितिः कथं विवरीतुं शक्या इत्यादि सर्वं विदुषां समक्षमुपेयादिति।

**भूतपूर्व :- पीठाध्यक्ष, आधुनिक संस्कृतपीठम्,**
**ज. रामानन्दाचार्यराजस्थानसंस्कृतविश्वाविद्यालयः**
**प्रधानसम्पादकः 'भारती' संस्कृतमासिकस्य**
**भूतपूर्वोऽध्यक्षः राजस्थान संस्कृत अकादम्याः,**
**निदेशकश्च संस्कृतशिक्षाभाषाविभागयोः,**
**राजस्थान सर्वकारीययोः**
**सी/8, पृथ्वीराज रोड, जयपुर-302001**

# व्याकरणस्य उपयोगिता
## (Utility of Grammar)

❑ महेशचन्द्रमीना

तत्र भारतीयसंविधाने मान्यता-प्राप्ताः द्वाविंशति सङ्ख्याकाः भाषाः सन्ति। तासां परस्परम् इलेक्ट्रानिक-विकासाय यान्त्रिकानुवादाय च व्याकरणस्य उपयोगिता क्रियते तर्हि भारतवर्षस्य भाषाशोधविभागस्य कृते महान् आर्थिकलाभो भवति। कथं भवत्यार्थिकलाभः ? व्याकरणोपयोगेन भारतीयभाषाविकासार्थमिति चेदुच्यते

(1) द्वाविंशतिभाषाणां यान्त्रिकानुवादविकासाय परस्परं द्वयोः भाषयोः बृहत्कोशयोः व्याकरण-विश्लेषकस्य वा सङ्गणकीययन्त्रस्य विकासार्थं षट्षष्टि-कोटिमितं धनमावश्यकं भवति।

(2) यदि व्याकरणविश्लेषकस्य स्थाने संस्कृत-व्याकरणस्य व्यावहारिकं ज्ञानम् उपयुज्यते तर्हि केवलम् एकादशकोटिमितं धनमावश्यकं भवति।

(3) इत्थञ्च सुस्पष्टं भवति व्याकरणोपयोगिता ज्ञानं पञ्चपञ्चाशत्कोटिमितस्य धनस्य लाभाय हितं साधयति।

(4) अस्य प्रमाणञ्च ट्रिपलआईआईटी हैदराबाद-स्थस्य भाषाप्रौद्योगिकीशोधविभागः एतादृशं कार्यं कृत्वा पूर्वं तु ऋतुविज्ञानविभागाय (मौसम विभाग) ततः परम् अन्ताराष्ट्रियस्तरे गूगलमध्ये भारतीयभाषायां हिन्द्याम् आङ्ग्लभाषातः अनुवादः शक्यते द्रष्टुमिति। साम्प्रतमपि द्रष्टुं शक्यते मोबाइलयन्त्रमुद्घाट्य। इतः परं व्याकरणस्य उपयोगितायाः विशदं विवेचनं प्रस्तूयते-

संस्कृतभाषा सर्वासां भाषाणां जननीरूपे अङ्गीकृता। अस्या माहात्म्यं मानवसृष्टेः प्राक्कालादेव चन्द्रतारकवत् अद्यापि वर्तते। अस्या भाषायाः नूतनतायाः मूलं संस्कृतव्याकरणं वर्तते। संस्कृतभाषा तद् व्याकरणञ्च विश्वेऽस्मिन् सर्वोत्कृष्टरूपात्मकं वर्तते।

संस्कृतभाषा विश्वभाषाणां जननीति यदुच्यते तत् प्रायः मयापि अनुभूयते तथा आङ्ग्लभाषायां यथा संस्कृतस्य प्रभावः तथैव फ्रांसभाषायामपि दृश्यते किन्तु फ्रांसभाषा आङ्ग्लभाषापेक्षया उच्चारणदृष्ट्या संस्कृत-मेवानुसरतीति। कथम् इति चेदुच्यते? आङ्ग्लभाषायां तवर्गः न मिलति किन्तु फ्रांसभाषायां संस्कृतात् स्वीकृत इति।

साम्प्रतिके समये तु पाणिनीयव्याकरणमेव व्याकरणनाम्नावबोध्यते। लाघवप्रियेण पाणिनिना प्रत्येकवर्णः सुचिन्तनात्मकः सप्रयोजनात्मकश्च स्थापितः। व्याकरणमहाभाष्ये प्रथमाह्निके व्याकरणस्य अनेकानि प्रयोजनानि उक्तानि सन्ति। तेषु पञ्चप्रयोजनानि मुख्यत्वेन स्वीकृतानि सन्ति। तद्यथा-

**'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।'**

(महाभाष्ये प्रथमाह्निके)

व्याकरणं नाम तच्छास्त्रं यत् लघुतरं शब्दङ्करोति। तदुक्तम्-

**'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।'**

(परिभाषेन्दुशेखरः परि.-33)

लोकेऽस्मिन् पदार्थानां प्रतिपादने न्याय-व्याकरण-योरुपयोगित्वं सर्वैरेव स्वीकृतम्। यथा सर्वाणि दर्शनानि मोक्षसाधनानि मन्यन्ते तथैव व्याकरणदर्शनमपि मोक्षसाधनमिति वैयाकरणानां सिद्धान्तः।

यथोक्तं भर्तृहरिणा -

**'इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयञ्च मोक्षमाणानामजिह्मा राजपद्धतिः'**

(वाक्यपदीयम् - 2/237)

व्याकरणशास्त्रमिदम् अष्टविधमासीत्। तत्र प्रमाणं बोपदेवेन विरचिते कल्पद्रुमे -

**'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः।।'**

एवं सत्स्वपि बहुषु व्याकरणेषु पाणिनीयव्याकरणं सर्वातिशायीति सर्वे उररीकुर्वन्ति।[1]

आदौ इन्द्रेण वाचं मध्यतोऽवक्रम्य व्याकरणं कृतं कारितं वा ततः बहूनि व्याकरणानि रचितानि। वेदाङ्गरूपाणि वेदरक्षायै वेदस्य ज्ञानं विज्ञानञ्चेति।

'सुविज्ञानं चिकीतुषे' विवेकपूर्वकं ज्ञानं विवेकिने वैज्ञानिकाय व्याकरणं सत्यबोधाय असत्यपरिहाराय प्राकृतिकन्यायोपस्थानाय देशविदेशव्यापारयोः सुरक्षा-विज्ञानस्य च प्रायोगिक-फललाभाय वस्तुक्रयविक्रय-विज्ञाने च व्याकरणं समुपयुज्यते। 'नामरूपे व्याकरवाणि सत्यानृते प्रजापतिः' इति वेदवचनेन सत्यस्य मिथ्यायाश्च विभाजनार्थं व्याकरणं प्रयुक्तम्।

वाल्मीकि-रामायणे सुन्दरकाण्डे सीतायै आश्वासनार्थं याः याः घटनाः कथारूपेण जाताः। ताः ताः व्याकरोतु नः इति हनुमन्तं प्रति यद्वचनं व्याकरणात्मकं तत्कथाः स्पष्टीकरणार्थे प्रयुक्तम्। महाभारते च विराटनगरे अज्ञातरूपाय युधिष्ठिराय विराटनृपतिः पृच्छति पाण्डवैः द्यूतक्रीडाकाले व्याकरणं कथं न कृतम्। अत्र व्याकरणं नाम उचितानुचितचिन्तनं रूपं प्रतिपादितं विलसति।

इदानीं तावत् व्याकरणं नाम प्रौद्योगिकीरूपेण ऋग्वेदस्य 'ऋध्यामः नवेन कर्मापसा' ऋक्-1/111 इति वचनं सार्थकीकरोति। यथा-विश्वस्य भाषाणां परस्परम् अनुसारकयन्त्रेण विचारविनिमयङ्कारयति सति महद्-विज्ञानरूपं भाषा प्राद्यौगिकीरूपं बिभर्ति।

आधुनिकयुगे व्याकरणं नाम दुःखं परिहृत्य सुखं करोति। चिकित्साशास्त्रं जातम्। मूकबधिराणां कृते उपचाराय प्रयुज्यते। व्यापारवृद्धये समृद्धिप्राप्तये विज्ञापनतकनीकीरूपेण च प्रयुज्यते इति दिक्।[1]

## उपसंहारः -

वैदिकलौकिकशब्दयोरनुशासनम्-शब्दव्युत्पादकं शास्त्रं व्याकरणं समुच्यते। अष्ट व्याकरणानि प्राचीनकाले प्रचलितानि तानि अधीत्य हनुमान् रामलक्ष्मणाभ्यां सह वार्ताव्यवहारकाले न किञ्चिदपि अपभाष्य हनुमान् उत्तमः वैयाकरणः इति तथ्यं रामः प्रमाणीकृतवान्। इत्थञ्च बहूनि व्याकरणानि ज्ञानतत्त्वस्य अधिकतया विस्तरं कर्तुं समर्थानि जातानीति।

वेदानां रक्षार्थं विभक्तिपरिवर्तनं कृत्वा मन्त्राणां याज्ञिके कर्मणि शुद्धोच्चारणाय समीचीनविशुद्धमन्त्र-प्रयोगाय 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति।' तत्र प्रधानं व्याकरणम् अध्येतव्यम्। लघुनोपायेन शब्दान् प्रतिपत्तुं प्रबोद्धुं वा व्याकरणं पठनीयम्। असन्देहार्थमपि व्याकरणं पठनीयम्। इत्थञ्च प्राचीनकाले आधुनिककाले च साम्प्रतमपि वर्तते व्याकरणस्य महती उपयोगिता इति सिद्धम् इति दिक्। विस्तरस्तु मम शोधप्रबन्धे द्रष्टुं शक्यते।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः जयपुरः**

1 आदौ इन्द्रेणः........... प्रयुज्यते इति दिक्
(महेशचन्द्रमीना-शोधप्रबन्धे पृष्ठ संख्या 230-31)

1 संस्कृतभाषा विश्वभाषाणां........... उररीकुर्वन्ति।
(महेशचन्द्रमीना-शोधप्रबन्धे पृष्ठ संख्या 6-7)

# श्रीजीमहाराजानां कृतिषु भक्तितत्त्वम्

❑ अनिरूद्ध दाधीच

अनन्त श्रीविभूषित जगद्गुरू गोलोकवासी श्रीराधासर्वेश्वर शरणदेवाचार्य श्री ''श्रीजी' महाराजानां कृतिषु भक्तितत्वम् विवेच्यते।

संस्कृत भाषाया: वाङ्मयं सुविस्तृतम् वर्तते। अस्य मूलकारणम् साहित्यसर्जकानां सृजनकार्यस्य नैरन्तर्यम् विद्यते। आर्यधर्माणामनुयायिमि: आजीवनं तपद्धि: यानि संग्रथितानि ग्रन्थरत्नानि तानि सर्वाण्यपि देववापष्या: साहित्यसमृद्धिं सम्यादयन्ति। भारतीयसंस्कृते: प्रचार-प्रसारार्थमनेके सम्प्रदाया: संलग्ना: सन्ति यथानिम्बार्क-सम्प्रदाय:, शैवसम्प्रदाय: यामुनाचार्य-सम्प्रदाय:, वल्लभ-सम्प्रदाय:, रामानुजसम्प्रदाय: रामानन्दसम्प्रदाय: इत्यादय:।

**एतद्देश प्रसूतस्य सकाशादग्रजन्मन:**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवा:**

एतेषां सम्प्रदायानां मध्ये द्वैताद्वैतसिद्धान्तेन सम्पोषित: भगवत् हंसमतानुयायी श्रीनिम्बार्कसम्प्रदाय: अनादिकालीन: सर्वजनहितकारी वैष्णवजनेषु समादरणीय: सुप्रसिद्धो वैदिकज्ञानेन संवलितो भक्तिरसेन परिपूर्णोऽन्यतम: सम्प्रदायोऽस्ति। एष: सम्प्रदाय: वास्तविकरूपेण प्रेम-लक्षणानुरागात्मिकां भक्तिमेव साधनमार्गे सर्वश्रेष्ठां स्वीकरोति।

निम्बार्कसम्प्रदाये परम्परायां गुणगणगौरवविशिष्टेष्व-न्यतमा अष्टचत्वारिंशतमा आचार्यरूपेण अनन्त श्रीविभूषित जगद्गुरु श्री राधासर्वेश्वरशरण देवाचार्य महोदया: निम्बार्कतीर्थे निम्बार्काचार्य पीठाधीश्वरस्य पदं अलंकुर्वन्ति। आचार्य: बहुभाषाविद् व्याकरणसाहित्ये दर्शनादि महोदधितलावगाही कविरयं समस्यापूर्तो सिद्धहस्त: लब्धप्रतिष्ठश्चाऽस्ति। अयं स्वयशस्वि जीवने विपुलं साहित्यं प्रणीतवान्। सम्प्रति समाजे भारतीयसंस्कृतिं क्षीयमाणां दृष्ट्वा एतै: संस्कृतोपासना मनसा वाचा कर्मणाऽधारीकृता। एतै: निजं सम्पूर्णमपि जीवनं संस्कृते: समुन्नत्यर्थ समर्पितम्। महाभागा: लोककल्याणार्थं संस्कृतविकासार्थं च चत्वारिशदधिकं संस्कृत हिन्दी भाषा माध्यमेन ग्रन्थानां गद्यपद्यात्मकरूपे रचनामकुर्वन्।

श्री ''श्रीजी'' महाराजानां काव्येषु भक्ते: महत्वपूर्ण स्थानं वर्तते। महाभागा: स्वग्रन्थेषु विभिन्नप्रकाराणि वर्णनानि अकुर्वन्। तेषु ग्रन्थेषु भक्तितत्वस्य प्रधानता वर्तते। भक्तिं विना मानव जीवनमपूर्ण मस्ति। राधामाधवरसविलासे कथयन्ति यत्-

**सकल शास्त्र का सार है, युगल भक्ति मय प्रेम**
**यही परमधन भक्तजन, शरण हृदयगत नेम**

राधामाधवरसविलास: 7/95

गोस्वामितुलसीदासमहोदय: कथयति यत् जीवने भक्तिं बिना किमपि नास्ति।

**भक्ति हीन नर सोहत कैसे, बिनु जल वारिद देखिये जैसे।** भारतस्य भक्तिरूपे कथयन्ति यत्-

**देशा: समग्रा: श्रुतिधर्मशिक्षां सम्प्राप्नुवन्तीति महामहत्वम्।**
**सत्प्रेरणां शास्त्रयुतां च यस्मात् तं भारतं नौमि सुभव्यरूपम्।।**

(भारत भारती वैभवम्-33)

महाभागानां काव्येषु नवधाभक्ति: विस्तृत रूपेण मिलति-

**नवधा भक्ति प्रसिद्ध है श्रवण-कीर्तन सार।**
**श्री हरि सुमिरण पदसेव शरण समर्चन धार।।**
**मनसा वन्दन-दास्य-सख्य आत्मनिवेदन ज्ञान।**
**नवधा भक्ति शास्त्र विहित, शरण वरण मतिमान।।**

भक्तिं विना मानव जीवनमपूर्णमस्ति, भक्तिरेव मानवस्य सर्वस्वमस्ति। तेषां कृतिषु विविधभक्ति: यथा-श्रीराधामाधव भक्ति:, राष्ट्रभक्ति:, गोभक्ति:, गुरुभक्ति: एतेषां तत्वानां प्रधानतास्ति। धन्या: सन्ति ईदृशा महापुरूषा: यै: स्वस्य सम्पूर्ण जीवनं परोपकाराय समर्पितम् सत्यमेव उक्तम्-परोपकाराय सतां विभूतय:।

कण्ठे सर्वेश्वरो यस्य ह्युपदेशसुधा मुखे शान्तो दान्तो महोदारो लोकानुग्रह कारक: अधर्मशमनं धर्मरक्षणं भुवि यद्व्रतम् राधासर्वेश्वराख्यं तं शरणं च गुरुं भजे।

**शोधार्थी**

# श्रीअजमल-भक्ति-गाथा ( काव्यम् )

( मङ्गलाचरणम् )

( गताङ्कादग्रे )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

जैसलमेर-नरेशेन वीरायाजमलाय च।।
प्रदत्ता जयसिंहेन मैणादे ''स्वकुमारिका''।। 30।। ( ख )

विवाहमण्डपे कन्या वस्त्राभूषणभूषिता।
राज्ञोपवेशिता पक्षी छलेन मन्दलोचना।। 31।।

पणिग्रहणमात्रेण 'मैणादे' ऽभूत्सुलोचना।
वर-भक्त्याश्चमत्कृत्या जाता सर्वाङ्गशोभना।। 32।।

महात्मनो रणसिंहस्य गुरुभक्तेर्बलं परम्।
द्वारकानाथ-भक्तेर्हि प्रत्यक्षैषा चमत्कृतिः।। 33।।

भक्त्याश्चमत्कारमिदं विलोक्य नार्यो जगुर्मङ्गलगीतकानि।
अखण्डदाम्पत्यसुखाय इन्द्राः स्वाशीर्वचोभिर्युयुजुः प्रहृष्टाः।।34।।

दुर्गमेकञ्च भूक्षेत्रं दासदासीजनांस्तथा।
बहुलं पारिबर्हञ्च कन्यादाने ददौ नृपः। 35।।

यशस्वी धार्मिको राजा 'मैणादे' सहधर्मिणी।
ग्रामे स्वे चोण्डुकाश्मीरे राजेते राज-दम्पती।। 36।।

सर्वसौभाग्यसम्पन्नो दानी मानी दयानिधिः।
परन्त्वपुत्रतादुःख-सन्तप्तो भूपतिः सदा।। 37।।

वर्षर्तावेकदा दैवाद् घटिता घटनाऽऽद्भुता।
राज्ञा दृष्टाश्रुता ग्रामे मनःसन्तापदायिनी।। 38।।

वृष्ट्या जलार्द्रां धरणीं समीक्ष्य स्कन्धेषु सन्धार्य हलानि लोकाः।
सुप्रस्थिता ये कृषकाः प्रभाते प्रत्यागतास्तेऽजमलं विलोक्य।।39।।

अपुत्रं सम्मुखं दृष्ट्वा समायान्तं नराधिपम्।
मत्वाऽऽपशकुनं तेऽद्य प्रत्यायाताश्च कर्षकाः।। 40।।

एतज्ज्ञात्वा नृपः क्षुब्धो विषण्णः खिन्नमानसः।
अपुत्रस्य गृहं शून्यं गृहस्थो नीरसस्तथा।। 41।।

धिग्जीवनं प्रजाहीनमिति मेने नृपस्ततः।
प्रयत्नैः पुत्रप्राप्त्यर्थं धर्मज्ञो भूपतिः सदा।। 42।।

दानव्रततपोहोमैर्ययाज द्वारकेश्वरम्।
अथैकदा पतिप्राणा राज्ञी मिष्टं प्रियं वचः।
पुत्रकामाऽऽह मैणादे भर्ता रंविनयान्विता।। 43।।

आशुतोषं महादेवं विश्वनाथमुमापतिम्।
सेवितुमर्चितुं कार्या काशी-यात्रा सुताप्तये।। 44।।

निशम्य तद्वचो भूपः समादृत्य च भावनाम्।
सपत्नीको ययौ काशीं भृत्यैर्भक्तजनैर्युतः।। 45।।

नत्वा काशीं पुरीं प्राङ्गामन्नपूर्णाञ्च भैरवम्।
प्रीत्यर्थं विश्वनाथस्य नित्यं ध्यानजपार्चनैः
समुपोष्य निराहारः सरात्रव्रतं दधौ।। 46।।

पाद्यार्घ्यगन्धाक्षतधूपदीपैः श्वेतार्कपुष्पैरथ विल्वपत्रैः।
पञ्चामृतेनेक्षुरसेन गङ्गाजलाभिषेकैश्च सवेदपाठैः।। 47।।

विधाय विधिवत्पूजां ध्यानरम्योऽभून्नृपस्तदा।
शुश्रावाकाशवाणीं तां सर्वकामफलप्रदाम्।। 48।।

गच्छ द्वारावतीं राजन् द्वारकेशो वरप्रदः।
पुरयिष्यति ते कामान् भगवान् भक्तवत्सलः।। 49।।

अशरीरगिरं श्रुत्वा भूपतिर्हृष्टमानसः।
विश्वनाथ-कृपादृष्ट्या कृतार्थो गृहमागतः।। 50।।

अपुत्रता-क्लेशमनोव्यथार्तः शिवाज्ञया सन्ततिमाप्तुकामः।
श्रीद्वारकानाथमनाथनाथं राजा सभार्यः शरणं जगाम।। 51।।

श्रीकृष्ण गोविन्द हरे मुरारे संकीर्तयन्तो हरिभक्तिमन्तः।
द्वारावतीं राज-कुलेन साकं लोकाः समुत्साहयुताः प्रयाताः।।52।।

योगयोगेश्वरं कृष्णं द्वारकेशं जगद्गुरुम्।
तुष्टाव भूपतिर्नत्वा रुक्मिणीवल्लभं हरिम्।। 53।।

श्रीद्वारकाधीशमनन्तमाद्यमानन्दकन्दं भुवनैकवन्द्यम्।
श्रीमज्जगन्नाथमनाथबन्धुं श्रीकृष्णचन्द्रं शरणं प्रपद्ये।। 54।।

हेनाथ! विश्वेश्वर! विश्वरूप! हे वासुदेवाखिललोकनाथ।
गोविन्द! गोवर्धननाथ! विष्णो! प्रभो! प्रपन्नार्तिहर! प्रसीद।।55।।

विधिवत्पूजितो भक्त्या प्रार्थितो द्वारकेश्वरः।
याचितो वंशवृद्ध्यर्थं न ब्रूते न शृणोति मे।। 56।।

श्रीविग्रहे रुषाविष्टो निक्षिप्य मोदकं नृपः।
अद्यतो मूर्तिपूजाञ्च न करिष्ये जगाद ह।।
देहि मे तनयं कृष्ण ! नो चेत् प्राणांस्त्यजाम्यहम्।। 57।।

राज्ञाक्षिप्तं जवेनातिरुषा तन्मोदकं हरेः।
शिरसि द्वारकेशस्य पपात पश्यतां सताम्।। 58।।

अद्भुतमशुभं कृत्यं दृष्ट्वा दृश्यमशान्तिदम्।
हे नाथ ! पाहि पाहीति राज्ञी प्राहाश्रुचोलना।। 59।।

किञ्चित्कालान्तरं राजा स्वस्थोऽभूत् शान्तमानसः।
शान्तिः शान्तिरिति प्रोचुर्भक्ता भीताश्च दर्शकाः।। 60।।
तद्विलोक्यार्चकः सद्यो जगाद भूपतिं प्रति।
अत्र तु पूज्यते भक्त्या द्वारकानाथ विग्रहः।। 61।।
यदि त्वं द्रष्टुकामोऽसि द्वारकानाथमीश्वरम्।
गच्छ राजन्! समुद्रस्थां दिव्यां स्वर्णमयीं पुरीम्।। 62।।
अर्चकेनैवमुक्तस्तु गतो वार्धेस्तटं नृपः ।
सुखासीनः पराभक्त्या श्रद्धाविश्वासमास्थितः।
चिन्तयामास ध्यानस्थः किं विधेयं मयेति च?।। 63।।
अगाधवार्धौ समवस्थितां तां द्वारावतीं हेममयीं पुरीं च।
त्वां द्रष्टुकामः समुपागतोऽहं मार्गं दयालो! मम देहि देव!।।64।।
कृष्णमन्त्रं जपन्भक्त्या स्मरन्कृष्णपदाम्बुजम्।
ध्यायन् श्रीद्वारकानाथं शुश्राव भूपतिर्गिराम्।। 65।।
आगच्छ भोः समागच्छ त्वं तु भक्तः प्रियोऽसि मे।
तन्निशम्य समुत्क्षिप्य चुकूर्द वारिधौ नृपः।। 66।।
हाहाकारो ह्यभूत्तत्र लोकाः क्षुब्धाश्च दुःखिताः।
रुरुदुः शोकसन्तप्ताः क्रन्दन्तश्चावतस्थिरे।। 67।।
विचित्रा भगवल्लीला विचित्रा भक्तिभावना।
विचित्रं भगवद्धाम विचित्रा भगवत्कृपा।। 68।।
राजा वार्धिजलेऽगाधे निमग्नोऽपि सुरक्षितः।
दिव्यां स्वर्णमयीं रम्यां विश्वकर्मविनिर्मिताम्।। 69।।
अहो ! कृष्ण-कृपादृष्ट्या ददर्श द्वारकापुरीम्।
स्वर्गसिंहासनासीनं प्रभुं श्री द्वारकेश्वरम्।। 70।।
प्रणम्य दण्डवद्भक्त्या ददर्श सुस्मिताननम्।
अहो! श्रीद्वारकानाथ-मस्तके वस्त्रपट्टिकाम्।। 71।।
निबद्धां विस्मितो वीक्ष्य पप्रच्छ लज्जितो नृपः।
किमिदं भगवन् ! भवतां मस्तके वस्त्रपट्टिका?।। 72।।
भक्तेनैकेन रुष्टेन निक्षिप्तं मोदकं मयि।
रक्तस्रावोऽभवेत्तेन बद्धैषा वस्त्रपट्टिका।। 73।।
निशम्य राजा भगवद्गिरं तां कृताञ्जलिर्गद्गद्वाग्जगाद।
पपात भूमौ चरणारविन्दे क्षमस्व हेनाथ! ममापराधम्।। 74।।
न ते कोऽप्यपराधोऽस्ति भव्या ते भक्ति-भावना।।
मयैव नोत्तरं दत्तं सापराधोऽस्म्यहं तव।। 75।।
स्वभक्तवश्यो भगवाननन्यविश्वासभूमिं प्रणतं प्रजेशम्।
विलोक्य प्रीतः सदयस्तमाह सुस्वागतं भक्तवरोऽसि मे त्वम्।।76।।

## राजोवाच

मायावी राक्षसश्चैको द्वारकामार्गमास्थितः।
क्षेत्रे मे वर्ततेऽरण्ये क्रूरो लोकविनाशकः।। 77।।
न देवपूजां हरिकीर्तनानि न यज्ञदानानि हरेः कथाञ्च।
रक्षोबलाक्रान्तजना विभीताः
शक्ता न कर्तुं हि कदापि लोकाः।। 78।।
विपन्नाद् दुर्बलांल्लोकान् शक्तिहीनांश्च व्याकुलान्।
पाहि पाहि दयासिन्धो ! कार्यसिद्ध्यै वरं वृणे।। 79।।
हे कृष्ण ! द्वारकानाथ ! भक्ताभीष्टवरप्रद।
पुत्रं मे देहि रक्षोघ्नं त्वादृशं वंशवर्द्धनम्।। 80।।

## श्रीभगवानुवाच

तुष्टोऽस्मि राजंस्तवभक्ति-भावैः
परं त्रिलोक्यां न हि मादृशोऽन्यः।
अतो ममैवांशकलावतारो
विभूतिमान् वंशधरोऽस्तु पुत्रः।। 81।।
स्वधर्मनिष्ठापरिवर्द्धनाय दुरात्मनां मानविमर्दनाय।
समाश्रितानां परिपालनाय युगावतारो भविता सुतस्ते।। 82।।

## राजोवाच

धन्योऽहं कृतकृत्योऽहं दृष्ट्वा स्वर्णमयीं पुरीम्।
प्रपन्नः कामदं भक्त्या निर्भयं त्वत्पदाम्बुजम्।। 83।।
पुण्यानि स्मृतिचिह्नानि भवद्दर्शन-सन्निधेः।
देहि नाथ! दयासिन्धो! किं विधेयं मयाऽऽधुना।। 84।।

## श्रीभगवानुवाच

राजन्! ददामि चिह्नानि दिव्यानि मङ्गलानि मे।
नित्यपूजा-निमित्तानि स्वकामार्थसिद्धये।। 85।।
द्वे पुष्पे वैजयन्त्याश्च गेडिया ''वीरयष्टिकाम्''।
एकं रत्नमयं पात्रं शंखञ्चामलडाबलीम्।। 86।।
पीताम्बरं परं रम्यं पूजार्थं द्वारकेश्वरः।
राज्ञे च स्मृतिचिह्नानि दत्त्वा प्रीत्याऽब्रवीद्वचः।। 87।।
पुत्रो वीरमदेवाख्यः प्रथमस्ते भविष्यति।
द्वितीयस्त्वहमायास्ये रामदेवाख्यया भुवि।। 88।।

(निरन्तरम्)

(पूर्वप्राध्यापकः), पो.-छापर (चूरू)
Mob.: 9351226660

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# शुद्धाद्वैत-वेदान्त-ग्रन्थनिवहः

ऊनविंश्याः शताब्द्या उत्तरार्धे स्वकीययाऽप्रतिमया विद्यया भारते प्रतिष्ठिता विद्वन्मूर्धन्या अद्भुतशेमुषी-विचक्षणा आशुकवयः शुद्धाद्वैतदर्शनमहोदधयो भारतमार्तण्डपञ्चनदी गोवर्धनशर्मपादा गट्टूलालेत्युपाह्वाः प्रज्ञाचक्षुषोऽप्यपूर्ववाक्शक्तिधरा आसन्निति जानीयुरेव वरिष्ठा वर्षीयांसो विद्वांसः। एते महाविद्वांसो वाक्पटवोऽप्यभूवन् शतावधानिनोऽपि। राजस्थानीये कोटानगरे जन्म लब्ध्वा वल्लभाचार्यवंशरत्नानां कन्यां परिणीयैतैः प्रज्ञाचक्षुष्ट्वे सत्यपि प्रौढग्रन्थरत्नानां प्रणयनं कृतं लेखनं कारितं शास्त्रार्थपरिष्कारः कृतः, काव्यानि प्राणीयन्त। वल्लभाचार्यप्रवर्तितस्य पुष्टिमार्गस्य शुद्धाद्वैत-दर्शनस्य चाधिकृता विद्वांसोऽभूवन्निमे।

एते हि प्रौढावस्थायां मुंबईनगरे बडामन्दिरेतिप्रसिद्धे पुष्टिमार्गीयप्रतिष्ठाने गोस्वामिचरणानां श्रीगोकुल-नाथजीमहाराजानां सान्निध्ये तेषां प्रेरणया शुद्धाद्वैतदर्शन-विवेचकान् ग्रन्थान् प्रणैषुः, ये तदानीं प्रकाशिता अभूवन्। एतेषु वेदान्तचिन्तामणिनामा ग्रन्थः पञ्चदश-प्रकरणेषु शुद्धाद्वैतदर्शनस्य सिद्धान्तान् प्रौढशैल्यामनुष्टुप्सु स्पष्टीकरोति। नास्तिक्योच्छेदः, आविर्भावतिरोभाव-निरूपणं, ब्रह्मसाक्षात्कारः, विशिष्टाद्वैतविचारः इत्यादिविषया ग्रन्थेऽस्मिन्निरूपिता अभूवन्। ग्रन्थोऽयं सन् 1918 ई. वर्षे मुम्बईतो विद्वत्प्रवराणां मूर्धन्यमनीषिणां कविवर्याणां शुद्धाद्वैतदर्शनविचक्षणानां देवर्षि भट्टश्रीरमानाथशास्त्रिणां सम्पादने बड़ा मन्दिरस्थ बालकृष्णविद्यालयात् प्रकाशितोऽभूत्।

प्रकाशनस्यास्यैका शताब्दी व्यतीता। मुम्बईस्थानां गोस्वामिवर्याणां श्रीगोकुलनाथचरणानां कृपया प्रकाशितमिदमभूत्। एतस्य पुनरुद्धार आवश्यकोऽभूत्। सौभाग्यस्यायं विषयो यदेतेषां श्रीगोकुलनाथगोस्वामि-चरणानां पौत्रैः स्वयं मूर्धन्यविपश्चिद्भिः, शुद्धाद्वैतदर्शन-विचक्षणैः, विविधभाषाप्रकाण्डपण्डितैः श्री श्याम-मनोहराचार्यैरस्य पुनः प्रकाशनं वाञ्छनीयं मन्वानैः पुनः प्राकाशमानायितोऽयं ग्रन्थ इति सुमहान् प्रमोदः। कोल्हापुरस्थ वल्लभविद्यापीठट्रस्टसंस्थयाऽयं शत-वर्षानन्तरं पुनः प्रकाशितोऽस्ति ''सत्सिद्धान्तमार्तण्ड'' नामकेन विशालेनान्येनैकेन ग्रन्थेन सह। स्वतन्त्रतयाऽपि वेदान्तचिन्तामणिग्रन्थः ट्रस्टेनाऽनेन प्रकाशितः। सर्वे ग्रन्था निःशुल्क वितरणाय प्रकाशिताः सन्त्येवंविधा इत्यपि प्रमोदावहम्।

विद्वत्प्रवरैः भारतमार्तण्ड पञ्चनदीभट्टश्रीगोवर्धन-शर्मभिर्लेखित एकोऽन्योऽपि विशालो ग्रन्थः सत्सिद्धान्तमार्तण्डः ऊनविंश्याः शताब्द्या अन्ते प्रणीतो विंश्यां शताब्द्यां च प्रकाशितोऽभूत्। तस्यापि पुनः प्रकाशनं साम्प्रतमेव गोस्वामिवर्याणां विद्वत्प्रवर-श्रीश्याममनोहराचार्याणां प्रेरणया संस्थानेनाऽनेन विहितम्। सात्सिद्धान्तमार्तण्डाख्ये ग्रन्थेऽस्मिन् शुद्धाद्वैतदर्शनस्य प्रमुखानां सिद्धान्तानां विवेचनार्थम् अष्टौ प्रधानप्रश्ना उद्भाविता ग्रन्थकारेण। तेषामुत्तरस्वरूपे दार्शनिकसिद्धान्ताः शुद्धाद्वैतस्य प्रस्तुताः। प्रत्येकप्रश्नेऽ-वान्तरप्रश्ना अपि बहवः सन्ति येषामुत्तराणि स्पष्टीकुर्वन्ति सिद्धान्तान्। किं सर्वे वर्णा उपदेष्टव्याः? शूद्रा उपदेष्टव्याः तर्हि सच्छूद्रा असच्छूद्रा अपि किम्! भवत्सम्प्रदायः कः? कोऽर्थः संप्रदायशब्दस्य? इति प्रधानः प्रथमप्रश्नः। अवान्तरप्रश्ना अप्यस्य वर्तन्ते ''कस्मै प्रयोजनाय

प्रवर्तितोऽयम्?'' ''तत्र भवतां सम्मतिरस्ति न वा इत्यादयः'' एवमष्टौ प्रश्नाः तेषामवान्तरप्रश्नाश्च 442 संख्यकाः शास्त्रीयया रीत्या, सप्रमाणोद्धरणं प्रौढया शैल्या गद्ये उत्तरिताः। विशालोऽयं सिद्धान्तप्रकाशको ग्रन्थः शुद्धाद्वैतस्य दार्शनिकसिद्धान्तान् विशिष्टया हृदया-वर्जकशैल्या प्रकटीकरोतीत्यस्य विशिष्टं महत्त्वमासीत्।

ग्रन्थोऽयं सन् 1942 ई. वर्षे पंहरिशङ्करशास्त्रिणां सम्पादने निर्णयसागर मुद्रणालयात् प्रकाशितोऽभूत् (पञ्चमुद्रामूल्यात्मकः)। अत्र हि सम्पादकेन भूमिकायां विद्वन्मूर्धन्यानां श्रीगोवर्धनशर्मणां गट्टूलालाजीत्युपाह्वानां परिचयोऽपि विलिखितोऽस्ति, प्रश्नानां संक्षेपतः सूचनाऽपि प्रस्तुताऽस्ति, पर्यन्ते उद्धृतानामनुक्रमणिका-ऽपि निबद्धाऽस्ति। सोऽयं ग्रन्थोऽनुपलब्धोऽभूत्। पुनर्मुद्रणमिदं यथावत् जीरोक्सविधया कृतं यतो हि पुनष्टङ्कणे बह्व्योऽशुद्धयः सम्भाव्यन्ते, विशालस्यास्य ग्रन्थस्य टङ्कणं कियत् कठिनमिति कल्पयितुं शक्नुयुरेव सुधियः।

इत्थं हि सत्सिद्धान्तमार्तण्ड-वेदान्तचिन्तामणि-ग्रन्थयोर्युगपत् पुनः प्रकाशनात्मको ग्रन्थ एकोऽयं महानुपकारकः स्याद् दर्शनविपश्चिताम्। वेदान्त-चिन्तामणिः स्वतन्त्रतयाऽपि ग्रन्थरूपेण प्रकाशितः ट्रस्टेनानेन। सर्वस्यास्योपक्रमस्य स्वागतमाचरामः।

**सत्सिद्धान्तमार्तण्डः एवं वेदान्तचिन्तामणि :-**

**ले. भारतमार्तण्ड-पञ्चनदी श्रीगोवर्धन (गट्टूलाल) शर्मा सम्पादकः हरिशङ्करशास्त्री शुक्लः (पृ. पञ्चशताधिकानि) वेदान्तचिन्तामणिः, ले. श्रीगोवर्धनशर्मा (पूर्वसूचितः) सम्पादकः साहित्यरत्न वेदान्तभूषण महामहोपदेशक शुद्धाद्वैत-भूषण देवर्षि भट्ट श्री रमानाथ शर्मा (पृ. द्विशत पर्यन्तानि) (ग्रन्था निःशुल्कवितरणार्थं प्रकाशिताः)**

## एकाक्षर कोषतल्लजः

संस्कृतभाषायामेकाक्षरकोषाणामस्ति पुरातनी परम्परा यतो हि भाषायामस्यां प्रत्येकमक्षरं कञ्चनार्थं बिभर्ति। एवंविधा अक्षरकोषाः पूर्वं सुप्रथिता भवेयुरेव किन्त्वमरकोषादीनां लोकप्रियतया अनन्तरं तेषामल्प-प्रचारः स्वाभाविक एवाऽऽसीत्। एकाक्षरकोषाणा-मितिहासे नवीनैका सुमहती क्रान्तिरानीताऽऽस्ति साम्प्रतमेव मुनिवर राजसुन्दरविजयप्रणीतेन सुविशालेन सुन्दरैकाक्षरकोषेण यो हि सपद्येव विशाले भागत्रये अहमदाबादस्थाने श्रुतज्ञानसंस्कारपीठेन प्रकाशितोऽस्ति। अस्य विशेषोऽस्ति प्रत्येकमक्षरस्य ये ये अर्था अद्यावधि सूचिता विद्वद्वर्यैः तेषामर्थसूचकानां शब्दानामपि विस्तृतं विवरणं पुण्यसौम्याख्यायां सुविस्तृतायां व्याख्यायां विशदीकृतम्। प्रथमं तु सुन्दरैकाक्षरकोषः प्रकाशितोऽस्ति यत्र मुनिसुन्दरविजयेन प्रत्येकाक्षरगर्भिता अर्थाः प्रकटीकृताः सन्ति। तदनन्तरं प्रत्येकमक्षरमादाय तेन प्रणीतानामर्थानां वाचका ये शब्दास्तेषां सुविस्तृता व्याख्या पुण्य सौम्यायां व्याख्यायां प्रसारिताऽस्ति।

विशेषत उल्लेखनीयमिदं यत् प्रत्येकमक्षरमादाय तन्निर्मितशब्दानां या व्याख्या प्रकाशिताऽस्ति तस्याः प्रत्येकमक्षरमेकं विशालमध्यायं भागं वा विशकलयति, प्रत्येकाक्षरसमर्पितस्य अध्यायस्य अथवा भागस्य भूमिकारूपेण भारतस्य शीर्षस्थानां संस्कृतविदुषां भूमिका, शुभाशंसा, प्ररोचना वा तेषां चित्रेण सह मुद्रिताऽस्ति। इत्थमसंख्या भारतीयाः संस्कृतसुधियो ये शीर्षस्था मन्यन्ते, कोषेणानेन सम्बद्धाः सञ्जाताः सन्ति।

अयं हि वर्णकोषो नाऽस्ति, अक्षरकोषोऽस्ति अतः

केवलं वर्णा एव नाऽत्र विस्तारिता अपि तु प्रत्येकवर्णेन येऽक्षरा निष्पद्यन्ते, तैश्च ये शब्दा उत्पद्यन्ते तेषामपि विस्तृता व्याख्या कोषेऽस्मिन् विस्तारिताऽस्ति यथा मकारेण मो, म्रो, म्या, म्रा इत्यादयः, वकारेण वाक्, विट्, व्य, व्रः, व्यः इत्यादयः अक्षरा निष्पद्यन्ते, तेषामर्थः, सन्दर्भा इत्यादि सर्वं पुण्यसौम्यां व्याख्यायां विशदीकृतम्।

इत्थं विशाले भागत्रये सुन्दरैकाक्षरकोषो यः सम्प्रति प्रकाशितः स नूतनमेकमितिहासं प्रवर्तयेदित्याशास्यते यतो हि तृतीये भागे (कोषसंग्रहे) अद्यावधि यत्र कुत्रापि प्रणीता यत्र कुत्र वा परिज्ञाताः सर्वे एकाक्षरकोषाः संगृहीताः सन्ति। सौभरि-हलायुध-महेश्वरप्रभृतिभिः कोषकारैर्ये एकाक्षरकोषाः प्रणीताः शब्दकल्पद्रुमादीनां परिशिष्टरूपेण राधाकान्तबहादुरप्रभृतिभिर्ये एकाक्षर-कोषाः प्रकाशिताः, एवंविधानां 50 एकाक्षरकोषाणां यथावदुद्धरणं सव्याख्यं तृतीयेऽस्मिन् विशाले खण्डे समुद्धृतमस्ति। तदेतत्सङ्ग्रहणं विशालं मुद्रणं च नूनं नवीनमेकमेकाक्षरकोषेतिहासं जागरयेदेव।

प्रत्येकमक्षरमादाय या व्याख्या मुद्रिता तस्या भूमिकारूपेण, प्ररोचनारूपेण, अभिमतरूपेण च भारत-विख्यातानां पञ्चाशदधिकानां समेषां विदुषां प्रत्यक्षरं यः सहयोगोऽत्राऽऽमन्त्रितः, तेषामभिमतानि सचित्राणि यथा पूर्वसूचितविधया प्रकाशितानि, तान्यपि समस्तं संस्कृतसुधीसमाजं कोषेणानेन साधु संयोजयन्तीति नूतनः प्रयोगोऽपि समुल्लेखनीयः।

प्रथमस्य भागद्वयस्याभिधानमस्ति ''सुन्दरैकाक्षर-कोषः'', तृतीयस्याभिधानमस्ति ''एकाक्षरनाम कोषसंग्रहः'', अत्रेतरेषामपि सम्पादकानां साहाय्यं गृहीतं स्यात् किन्तु विशालस्यास्य कोषस्य प्रणेतारो मुनिराजसुन्दरविजयाः शतशः प्रणतीनां वर्धापनानां च पात्रतामधिगच्छन्तीति सविनयं निवेदयन्तः प्रमोदामहे।

**सुन्दरैकाक्षरकोषः (भागद्वये), प्रणेता मुनि-राजसुन्दरविजयः प्रकाशकः श्रुतज्ञान-संस्कारपीठ, वासणवाला कंपाउंड, विश्वनंदिकर जैन देरासर के सामने, भगवान नगर का टेकरा अरूण सोसाइटी के पास, पालडी, अहमदाबाद, प्रथमो भागः पृ. 440, मू. 1000/- द्वितीय भागः पृ.448 मू. 1000/- द्वयोः पृष्ठ संख्या प्रायो नवशतम् मू. 2000/- एकाक्षरनाम कोष संग्रहः (पृ. 296, मू. 1000/-)**

# ।। प्राणदायकाः पादपाः ।।

❑ पं. रमेशचन्द्र शर्मा

सदैव लोके तरवश्च पालिताः
अनेन पर्यावरणं सुरक्षितम्।।
वनेषु तेषां सघनाश्च शीतलाः
प्रियाश्च छायाः मधुराः मनोहराः।। 1।।

सर्वे हि जीवाश्च वसन्ति लोके
विषेण धूमेन च पीडितास्ते।।
यन्त्रोद्गतेनापि च रोगयुक्ताः
वृक्षाः हि तेषां खलु औषधं तत्।। 2।।

सुशीतलाः पत्रफलैश्च युक्ताः
हरन्ति तापं च वनस्य वृक्षाः।।
छायान्वितास्ते च पिबन्ति धूमम्
यच्छन्ति प्राणानपि प्राणवायुम्।। 3।।

प्रदूषणानेन विषाक्तमेवम्
जातं हि सर्वं जलभोजनं तत्।।
कथं भवेत् पादपरोपणं च
विचारणैषा सुजनैश्च कार्या।। 4।।

व्याख्याता

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

## गान्धिहत्यामिषेण संघस्योपरि प्रतिबन्धः।

30-1-1948 दिवसः देशस्य कृतेऽतीव दुर्दिवसः सिद्धोऽभूत्। तस्मिन् दिवसे सायं पंचवादने लोकवंद्यानां श्रीमतां गान्धिमहाभागानां हत्या समभवत्। तस्मिन्नेव क्षणे गुरुमहाभागाः स्वकीयान् प्रवासान् त्यक्त्वा नागपुरे सम्प्राप्ताः। पण्डितं जवाहरलालनेहरूमहोदयं वल्लभभाईपटेलं च द्रुतगामिसंदेशे (तार) विभिन्न प्रवृत्तिजनानेकसूत्रे निवेश्य तेभ्यः सम्यग् मार्गदर्शकः एतादृशस्य महात्मनो गान्धिमहोदयस्य व्यक्तित्वं प्रति श्रद्धाप्रकटी-करणेन सहैव तेषां हत्यां प्रत्यपि स्पष्टशब्देषु भर्त्सनाकृतासीत्। 1-2-48 दिने श्री गुरवः कारागारे प्रतिबद्धाः 4-2-48 दिने च संघस्योपरि प्रतिबन्धो योजितः। श्रीगुरुमहाभागैः तत्क्षणं संघस्य विसर्जनं कृतम्। तत्पश्चात् गुरुमहाभागैः नेहरूमहोदयं पटेलमहोदयं च स्नेहपूर्वकमुदारतया च सुदीर्घं पत्रं विलिख्य प्रतिबंधनिराकरणार्थं याचना कृता।

सर्वकारस्यादेशपत्रेषु गान्धिहत्यातिरिक्तं विविध-प्रकाराणां निन्दनीयानां हिंसाचाराणामारोपाः आरोपिताः। समस्तेऽपि देशे सहस्रावधि स्वयंसेवकाः कारागारेषु प्रक्षिप्ताः सम्पूर्णेऽपि देशे कांग्रेसजनैः समाजवादिभिः कम्यूनिष्टैश्च संघकार्यालयानां कार्यकर्तॄणां गृहाणां दाहो लुण्ठनं च प्रारब्धम्। सर्वकारतन्त्रस्यापि सततं संघोपरि विषवमनं प्रचलितमेवासीत्। गान्धिहत्याकारी गोडशे ब्राह्मण इतिकृत्वा महाराष्ट्रैः समीपवर्तिषु राज्येषु ब्राह्मणानां गृहावलुण्ठनं दाहश्च प्रारब्धः। एतादृशाऽग्नि-कांडे उत्तर-कर्नाटके तेरदालनाम्नि लघुग्रामे नवजनानां सजीवं दहनमभूत्। गुरुमहाभागानां गृहेऽपि आतङ्किभिराक्रमणं कृतम् । एतेभ्य आक्रमणकारिभ्यः शिक्षाप्रदानस्य शक्तिः संघे नासीदिति न परं देशस्यास्यां विषमपरिस्थितौ राष्ट्रीयसामंजस्यं स्थिरीकर्तुं संघेन किमपि भवतु शान्त्या सोढव्यमित्यादेशः प्रदत्त आसीत् गुरुमहाभागैरपि अस्यां परिस्थितौ शान्तः सौहार्द्रपूर्णः संयमितो व्यवहारः करणीय इति विस्तृतवक्तव्यं प्रसारितम्। स्वकार्यालय आक्रमणकारिणां सम्मर्दं निराकर्तुं सुसज्जान् दण्डधारिस्वयंसेवकानपि शान्त्या गृहे प्रत्यावर्तनार्थं गुरुमहाभागैरादेशं प्रदाय सन्ध्यावन्दनार्थ-मन्तप्रवेशः कृतः। स्वसमीपस्थान् कार्यकर्तृबन्धून् ते अवदन् यस्य समाजस्य सेवार्थमहं कटिबद्धोऽस्मि मम कारणात् तस्य रक्तबिन्दुमपि प्रवाहयितुमवसरं न दास्य इयमेव तेषामग्नि-परीक्षा। तेषामादेशानुसारं सवैः स्वयंसेवकैः इमे अत्याचाराः शान्त्या स्वीकृताः। तदनन्तरं सर्वकारेण गुरुमहाभागो बन्दी विधाय सिवनीकारागारे स्थापितः।

ततोऽपि गुरुमहाभागैः नेहरूमहोदयं पटेलमहोदयं च पत्रं सम्प्रेष्य संघोपरि योजितं प्रतिबन्धं निराकर्तुं याचना कृता परं तयोरुपरि पत्राणां न कोऽपि प्रभावः संजातः प्रत्युत तावुत्तरेण नवनवानारोपानारोपयन्तिस्म अस्मिन्नेवान्तराले कारागारान्मुक्ताः गुरवः देहल्यां गताः। तत्र च नेतृभिस्सह वार्तालापस्थाने ते पुनरपि बद्धाः। महाराष्ट्रस्यास्मिन् कारागारे बैतुलस्थाने प्रक्षिप्ताः। अस्मिन् निवासस्याहारस्य चोपेक्षायाः कारणाद् गुरुमहाभागानां स्वास्थ्यं विकृतमभूत्। देहल्यां निवाससमये गुरुमहाभागैः समाचारपत्रेभ्यो विस्तृतमेकं वक्तव्यं प्रेषितम् तस्मिन् सर्वकारीयारोपाणां खण्डनं बलवच्छब्देषु कृतमासीत् सर्वकारात् न्यायं कर्तुं च याचना कृतासीत्। सर्वकारस्याह्वानं कृतं यदारोपान् प्रमाणयत प्रतिबन्धं वा निराकुरुत समस्तेऽपि देशे स्वरोऽयं गुञ्जायमानोऽभूत्।

**ब्रह्मपुरी, जयपुरम्**

# सन्तोषस्य पुरस्कारः

❑ श्रीमती आराधना धर्माधिकारी

एकदा कस्मिंश्चिद्देशे दुर्भिक्षमभवत्। क्षुधार्तैर्जनैः मरणं प्रारब्धम्। एकस्मिन् लघुतमे नगरे एको दयालुः श्रेष्ठी प्रतिवसतिस्म। सः प्रतिदिनं बालकेभ्य एकैकां करपट्टिकां दातुमघोषयत्। अन्येद्युरेकस्मिन्नुद्याने सर्वे बालकाः एकत्रिताः अभवन्। करपट्टिकादानमारब्धम्। करपट्टिका विविधाकाराः आसन्। सर्वे बालकाः परस्परमाघातं कृत्वा बृहतीं करपट्टिकामादातुं यत्नं कुर्वन्तिस्म। केवलमेका लध्वी बालिका एकतस्तूष्णीं स्थितासीत्। सर्वान्ते सा अग्रेगता। वैणवपात्रे केवलमेका लध्वी करपट्टिका अन्तिमावशिष्टासीत्। तामेव सा प्रसन्नतया अगृह्णात्। गृहे च गता।

द्वितीये दिनेऽपि करपट्टिकावितरणमभूत्। तदापि तस्यै सर्वान्तिमा लघ्वी करपट्टिकैव सम्प्राप्ता। गृहे आगत्य यदा सा करपट्टिका त्रोटिता ततः स्वर्णमुद्रा निस्सृता तस्या माता अवदत्-इयं तस्यैव धनिकस्यास्ति। तस्मै देहि। बालिका प्रधाव्य गता। धनिकः अपृच्छत् बाले किमिति पुनरागतासि। निर्माणसमये पतिता स्यात्। स्वमुद्रां गृहाण। धनिकः अवदत्-नहि पुत्रि ! अयं ते सन्तोषस्य पुरस्कारः। अयि! मम सन्तोषस्य पुरस्कारस्तु पूर्वमेव सम्प्राप्तो यदाघाता न सोढव्या अभवन्। धनिको बालिकायाः उत्तरेणातितरां प्रसन्नः। बालिकां धर्मपुत्री-मकरोत्। मात्रे च वेतनं निश्चितमकरोत्।

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्



# आद्यशंकराचार्यस्य आत्मबोधग्रन्थे

## ''मोक्षसाधनवर्णनम्''

❑ युगल किशोर भारद्वाजः

आचार्यशंकरेण विषयेऽस्मिन् ''बिना ज्ञानं मोक्षो न सिध्यति'' इति प्रतिपादितम्। विद्या एव अविद्यां निर्वर्तयेत् यथा तेजस्तिमिरम् एव। अज्ञानकलुषं जीवनं ज्ञानाभ्यासाद् हि निर्मलं भवति अहं शुद्धः नित्यमुक्तः इति ज्ञानप्रकाशानन्तरं तज्ज्ञानं स्वयं लयं याति।

रागद्वेषादिसंकुलः संसारः स्वप्नतुल्यः। स्वप्नकाले सत्यवद् भाति प्रबोधे सत्यसद् भाति सर्वाधिष्ठानं ब्रह्म यावन्न ज्ञायते, तावद् जगत् सत्यवद् भांति। सच्चिदात्मनि सर्वं विश्वं व्याप्तम् यथा स्वर्णे सर्वाणि आभूषणानि प्रकल्पितानि।

यथाकाशो घट-पट-मठादि-नानोपाधिगतो भिन्नवद् भाति, तन्नाशे सति केवलाकाशो हि दृश्यते तथैव सर्वाः विविधाः व्यक्तयः। नाशे सति हृषीकेशो नारायण एव अवशिष्यते। यथा तोये विभिन्नवर्णादि रसादि आरोपिता भवन्ति, तथैव संसारेऽस्मिन् नानोपाधिवशादेव जातिनामा-श्रमादयः ब्रह्मण्यारोपिताः।

कर्मसंचितं शरीरं पञ्चकृतमहाभूतसंभवं दुःख सुखानां भोगायतनमुच्यते इति स्थूलशरीरम्। पंचेन्द्रियमनोबुद्धि-प्राणसमन्वितं भोगसाधनं सूक्ष्मांगं सूक्ष्म शरीरमुच्यते।

स्थूल-सूक्ष्म-कारण उपाधित्रितयाद् माया अविद्या-विद्याऽनिर्वाच्या कारणोपाधितः, कारणशरीरमुच्यते तदन्यम् आत्मानमवधारये त्।

आत्मा तु स्वभावशुद्धः, पंचकोषादियोगेन तत्तन्मयः इव स्थितः, भ्रमात् पंचकोषादिमयो भासते यथा स्फटिको विभिन्नवर्णादियोगेन विभिन्नवर्णमयो भासते।

अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनंदमय इत्येताः पञ्चकोशाः। पंचकोषमयदेहेन युक्तः सत्-चित् आनंदरूपः शुद्धस्वरूप आत्मा। तुषादिभिः कौशैर्मुक्तम् (भूसी रहितम्) तण्डुलम् इव अन्तर्शुद्धम् आत्मानं यो विजानाति स एव आत्मबोधयुतः शुद्धसत्वमयः मुक्तात्मा एव। इति मोक्षवर्णनम्

पूर्व अतिरिक्त निदेशकः
आयुर्वेद विभाग राजस्थान

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## विश्वामित्रचाण्डालयोः कथा

त्रेताद्वापरयुगयोः सन्धिकाल आसीत्। दैववशात्सम्पूर्णेऽपि भूमण्डले जलवृष्टिर्न जाता। द्वादशवर्षपर्यन्तं समस्तेऽपि भूप्रदेशे च जलवर्षण-स्याभावेन घोरं दुर्भिक्षमापतितम्। सर्वत्र कृषि-क्षेत्राणि तृणधान्यशून्यान्यासन्। गवां रक्षा दुर्लभा बभूव। सर्वत्र आपणविपणिशून्यानि नगराणि दृष्टिपथम् आयान्ति स्म। क्षुधार्तानां जनानां आर्तनादः सर्वत्र व्याप्त आसीत्। नगराणि प्रायः जनशून्यानि, ग्रामाः ग्रामस्थगृहाश्च निर्जनाः तीक्ष्णनिदाघेन दग्धप्रायाः बभूवुः। क्षुधार्ताः प्राणिनः सम्मुखमागतं प्राणिनं वीक्ष्य स्वक्षुधानिवृत्त्यर्थं तस्योपरि आघातं कुर्वन्ति स्म। एतादृशे सुदीर्घे दुर्भिक्षसमये धर्मस्य तिरोधानात् क्षुधार्ताः जनाः सम्मुखमागतं जनमपि खादन्ति स्म।

एषु दिवसेषु बुद्धिमतामग्रगण्यो महर्षिः श्रीविश्वामित्रोऽपि क्षुधार्तः आश्रमं विहाय खाद्यमन्विष्यन्नितस्ततः अटति स्म। एकदा स एकस्मिन्वने प्राणिवधकारकाणां हिंसकानां चाण्डालानां ग्रामे आगतोऽभूत्। तस्मिन् लघुग्रामे आहारमन्विष्यमाणो क्षुधार्तः ऋषिविश्वामित्रः प्रतिगृहं गत्वा भिक्षां ययाचे। किन्तु तेन एकं खाद्यकणमपि न प्राप्तम्।

सहसा तेन विश्वामित्रेण एकस्मिन् गृहे सद्यः कर्त्तिता श्वानजङ्घा दृष्टा। मध्यरात्रिपर्यन्तं तत्रैव स्थितो विश्वामित्रः। यदा रात्रौ सर्वे गृहस्था जना निद्राधीनाः संजातास्तदा सः तस्मिन् गृहे तस्य मांसखण्डस्य प्राप्त्यर्थं प्रविष्टोऽभूत्। तस्य गृहप्रवेशेन जागृतः स चाण्डालो मध्यरात्रौ गृहे प्रविष्टं जनं विलोक्य उच्चस्वरेणोक्तवान् 'कोऽसि त्वमिति।' समीपमागतं विश्वामित्रं ज्ञात्वा करबद्धः सः चाण्डालः तं विनम्रभावेन प्रणम्य पप्रच्छ। ''भो ब्रह्मन् ! मध्यरात्रौ गृहं प्रविश्य किं चेष्टसे? किं वाञ्छति भवान्?'' विश्वामित्रेणोक्तम्, ''हे बन्धुवर! अहं बुभुक्षितोऽस्मि। क्षुधार्तस्य व्याकुला मम प्राणाः देहं विमुच्य गन्तुमिच्छन्ति। अहं जानामि यत् मध्यरात्रौ चौरवत् कस्यापि जनस्य गृहे प्रविश्य गृहे स्थितस्य द्रव्यस्यापहरणं नास्ति धर्मानुकूलम्, किन्त्वहं अखाद्यमपीदं श्वानस्य मांसपिण्डं नीत्वा गमिष्यामि।'' चाण्डालेनोक्तम्, ''भो महर्षे ! इदं तु नास्ति धर्मसम्मतम्। प्रथमं तु इदं चाण्डालस्य द्रव्यम्, द्वितीयमस्तीदमभक्ष्यम्, तृतीयं चौर्यकर्मणास्य द्रव्यस्यापहरणं सर्वथा धार्मिकदृष्ट्या निन्दितम-प्यस्ति।'' विश्वामित्रेणोक्तम्, ''अहं भोजनस्याभावेन विगतेषु बहुषु दिवसेषु इतस्ततः अटन्नपि सुदीर्घकालात् किमपि खाद्यमप्राप्य प्राणरक्षार्थमेवेदं मांसपिण्डं विलोक्य अस्य प्राप्त्यर्थमत्रागतोऽस्मि।'' शास्त्रेप्युक्तमस्तिः-

येन येन विशेषेण कर्मणा येन केनचित्।
अभ्युज्जीवेत् खाद्यमानः समर्थो धर्ममाचरेत्।।

( शान्तिपर्व १४१ / ६३ )

**खाद्यमानः येन येन विशेषेण कर्मणा येन केनचित् अभ्युज्जीवेत् समर्थो धर्ममाचरेत्। अतः शास्त्रादेशानुसारमहं येन केनचित् प्रयत्नेन प्रथमं प्राणरक्षां कृत्वा तदनन्तरं दैनन्दिनं व्रतोपवासादिकं कृत्वा पापकर्मणः प्रायश्चित्तं करिष्यामि।**

**चाण्डालेनोक्तम् भगवन् ! इदं कुक्कुरमांस-भक्षणं भवादृशानां कृते दुःखकरं पातकमस्ति। अतः अनेन निषिद्धेन पापकर्मणा स्वात्मानं रक्षतु भवान्।**

**विश्वामित्रेणोक्तम्, 'त्वं धर्मोपदेशस्य विषये अधिकृतः पुरुषो नाऽसि? अहं जानामि कस्यां परिस्थित्यां किं करणीयमस्ति।'**

**तदनन्तरं वेदोक्तेन विधिना अग्निप्रज्वालनं कृत्वा तेन विश्वामित्रेण देवकर्मपितृकर्मादिकं विधाय इन्द्रादिदेवानामावाहनं कृतम्। यदा तेन ऋषिणा विधिपूर्वकं तेषां देवानां कृते तस्य हविष्यान्नस्य पृथक्पृथगंशा यज्ञाग्नौ अर्पिताः, तदा सन्तुष्टैः इन्द्रादिभिस् तत्क्षणमेव सर्वत्र भूभागे जलवृष्टिः कृता। अनेन कर्मणा तत्र समस्ते क्षितितले अन्नादयः औषधादयश्च समुत्पन्नाः बभूवुः। पृथ्वीतलस्य सर्वे प्राणिनः पुनः अन्नादिकं औषधादिकं च संप्राप्य क्षुधानिवृत्ता रोगमुक्ताश्च संजाताः।**

**भगवान् विश्वामित्रोऽपि सुदीर्घकालिक-निराहारव्रतित्वात् ( कठोरतपश्चर्यायाः परिणामात् ) दग्धकल्मषः सन् अत्यद्भुतं सिद्धत्वं प्राप्तवान्। तेन द्विजश्रेष्ठेण तद् हवनं सम्पाद्य तस्य हविष्यद्रव्यस्या-स्वादनं विनैव देवान् पितृंश्च संतोष्य तेषामनुकम्पयैव पवित्रं भोजनं संप्राप्य स्वजीवनरक्षां चकार। शान्तिपर्वणि भीष्मपितामहेनाप्युक्तम्-**

**तस्मात् कौन्तेय ! विदुषा धर्माधर्मविनिश्चये।**
**बुद्धिमास्थाय लोकेऽस्मिन् वर्तितव्यम् कृतात्मना।।**

**तस्मात् कौन्तेय कृतात्मना विदुषा अस्मिन् लोके धर्माधर्मविनिश्चये बुद्धिमास्थाय ( विश्वामित्रवत् ) वर्तितव्यम्।**

## विश्वामित्र और चाण्डाल की कथा

त्रेता तथा द्वापर युग का सन्धि ( बीच का ) काल था। दैववश सम्पूर्ण भूमण्डल पर जल वर्षा नहीं हुई थी। बारह वर्ष तक समस्त भूप्रदेश पर जल वर्षा का अभाव होने से घोर दुर्भिक्ष पडा हुआ था। सर्वत्र कृषि के खेत तृण और अनाज से शून्य थे। गायों की रक्षा दुर्लभ थी। सर्वत्र हाट और दुकान से शून्य नगर दिखाई देते थे। भूख से पीडित मनुष्यों का आर्तनाद सर्वत्र व्याप्त हो रहा था। नगर प्राय: जनशून्य हो गए थे, गांव और गांव में बने घर निर्जन होकर तेज धूप के कारण प्राय: जल गये थे। भूख से पीडित प्राणी सम्मुख आए प्राणी को देखकर अपनी क्षुधानिवृत्ति के लिए उसके ऊपर आघात कर देते थे। इस प्रकार के लम्बे दुर्भिक्ष के समय में धर्म के तिरोधान (विलुप्तप्राय) हो जाने से भूख से पीडित लोग सामने आए मनुष्य को भी खा जाते थे।

इन दिनों में बुद्धिमानों में अग्रगण्य महर्षि श्री विश्वामित्र भी भूख से पीडित आश्रम को छोड़कर खाद्य पदार्थ को ढूंढते हुए इधर उधर घूम रहे थे। एक बार वे एक वन में प्राणियों का शिकार करने वाले हिंसक चाण्डालों के गांव में आए। उस छोटे से गांव में आहार को ढूंढते हुए भूख से पीडित श्रीविश्वामित्र ने प्रत्येक घर में जाकर भिक्षा मांगी। किन्तु उसने एक भी खाद्य कण प्राप्त नहीं किया।

सहसा उन विश्वामित्र ने एक घर में तत्काल कटी हुई कुत्ते की जङ्घा देखी। मध्यरात्रि पर्यन्त वहीं ठहर कर विश्वामित्र जब रात्रि में सभी गृहस्थजन निद्राधीन हो गए तब वे उस घर में उस मांसखण्ड को प्राप्त करने के लिए घुसे। उनके घर में प्रविष्ट होने से जागृत हुए वह चाण्डाल मध्यरात्रि में घर में प्रविष्ट हुए जन को देख कर ऊंचे स्वर से बोला, ''तू कौन है ?'' समीप में आए हुये विश्वामित्र को पहचान कर हाथ जोड़ कर उस चाण्डाल ने विनम्र भाव से प्रणाम करके पूछा, ''हे ब्रह्मन् ! मध्यरात्रि में घर में घुस कर क्या करते हैं ? आप क्या चाहते हैं ?''

विश्वामित्र ने कहा, ''हे बन्धुवर ! मैं भूखा हूँ। भूख से पीडित हुए मेरे व्याकुल प्राण देह को छोड़कर जाना चाहते हैं। मैं जानता हूँ कि मध्य-रात्रि में चोर की तरह किसी भी मनुष्य के घर में घुस कर घर में स्थित द्रव्य का अपहरण धर्म के अनुकूल नहीं है किन्तु मैं खाने के अयोग्य भी इस कुत्ते के मांस पिण्ड को लेकर जाऊंगा।'' चाण्डाल ने कहा, ''प्रथम तो यह चाण्डाल का द्रव्य है, दूसरे यह खाने योग्य नहीं, तीसरे चोरी करके द्रव्य का अपहरण करना सर्वथा धार्मिक दृष्टि से निन्दित भी है।''

विश्वामित्र ने कहा, ''मैं भोजन के अभाव में विगत बहुत दिनों से इधर उधर भटकता हुआ लम्बे समय से कुछ भी खाद्य पदार्थ न प्राप्त होने के कारण प्राणरक्षार्थ ही इस मांस पिण्ड को देखकर इसी प्राप्ति के लिये आया है। शास्त्र में भी कहा है'' :-

''भूख से पीड़ित जिन जिन विशेष कर्मों के द्वारा जिस किसी भी विधि से जीवन रक्षा करे (और) समर्थ होने पर धर्म का आचरण करे।''

चाण्डाल ने कहा, भगवन् कुत्ते का मांस भक्षण करना आप जैसे लोगों के लिए दु:ख कर पातक है। अत: इस निषिद्ध पापकर्म से आप अपनी रक्षा करें।

विश्वामित्र ने कहा, ''तुम धर्मोपदेश के विषय में अधिकृत पुरुष नहीं हो, मैं जानता हूं किस परिस्थिति में क्या करना चाहिये।''

इसके पश्चात् वेदोक्त विधि से अग्नि प्रज्वलित करके उन विश्वामित्र ने देवकर्म पितृकर्म आदि करके इन्द्र आदि देवों का आह्वान किया। जब ऋषि ने विधि पूर्वक उन देवों के लिये हविष्यान्न के पृथक् पृथक् अंश यज्ञाग्नि में अर्पित किए तब सन्तुष्ट हुए इन्द्रादि ने उसी क्षण सर्वत्र पृथ्वीदल पर जलवर्षा कर दी। इस कर्म से वहां समस्त पृथ्वी तल पर सारे प्राणी फिर से अन्नादिक और औषध आदि को प्राप्त करके भूख से और रोगों से मुक्त हो गये।

भगवान् विश्वामित्र ने भी बहुत लम्बे समय तक निराहार व्रत करने के कारण (कठोर तपश्चर्या के परिणाम स्वरूप) कल्मष (पाप) के जल जाने के कारण अद्भुत सिद्धत्व प्राप्त कर लिया। उस द्विज श्रेष्ठ ने उस हवन को करके उस हविष्यान्न के आस्वादन के बिना ही देवताओं और पितरों को सन्तुष्ट करके उनकी अनुकम्पा (दया) से ही पवित्र भोजन प्राप्त करके अपनी जीवन रक्षा की। शान्ति पर्व में भीष्म पितामह ने भी कहा है :-

''इसलिये हे कुन्तीसुत (अर्जुन) इस संसार में धार्मिक व्यक्ति को धर्म और अधर्म के विषय में संदेह होने पर बुद्धि का सहारा लेकर बर्ताव करना चाहिये।''

**किशनपोल बाजार:, जयपुरम्**

नारी-स्तम्भः

# सुमित्रा गरिम्णा गुरुः

❑ डॉ. राजेश्वरी भट्ट

बालकस्य जीवननिर्माणे मातुर्भूमिका महत्त्वपूर्णा विद्यते। माता केवलं बालकस्य लालनं पालनञ्च कृत्वा बाल्ये अक्षरज्ञानेन तं साक्षरं विधायैव आत्मनः कर्तव्यादुऋणा न भवति। अपितु बालकस्य व्यक्तित्वनिर्माणे मातुर्दायित्वं असिधाराव्रतमिव दुर्वहं दुष्करञ्च दृश्यते। माता क्षमा-धैर्ध-त्याग-श्रमादीनां गुणानामाश्रयेण बालस्य चरित्रे सदाचार-सुविचार-सत्संस्कारादीन् गुणानुद्भावयितुं मनसा-वाचा-कर्मणा समर्पिता दृश्यते। ज्ञायते यत् सुशासनवर्जितो बालक उच्छृंखलः सहैव परिवारस्य कृते शिरोवेदना भवति। एवमेव सन्मातुर्निर्देशने विकसितो बालः शाणोल्लिखित मणिरिव आभायुक्तो दृश्यते। नूनं बालकस्य जीवने मातुर्भूमिका घटस्य निर्माणे कुम्भकारस्य भूमिकेव महत्त्वपूर्णाऽस्ति। लोके मातुर्महिमानमनिर्वचनीयमनुभूय ''नास्ति मातृसमो गुरुः'' ''माता गुरूणां गुरुः'' ''मातृदेवोभव'' ''पितुः शतगुणा माता'' एवं ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' प्रशस्ति-परकैरेभिर्वचनैर्गीता प्रशस्ता वन्दिता च दृश्यते। सन्मातुरस्यां परम्परायां वाल्मीकिरामायणे वर्णिता, अयोध्यानरेशस्य दशरथस्य पत्नी, दशरथपुत्रस्य लक्ष्मणस्य माता सुमित्रा अग्रगण्याऽस्ति। लक्ष्मण-माता सुमित्रा सुख-दुःख-लोभमोह-रागविराग-पद-प्रतिष्ठा-मानापमानादिभिर्द्वन्द्वैरतीता परिवारस्य श्रेयस्कामिनी पुत्रस्य कीर्तिकामिनी सन्मातृरूपेण चित्रिता वर्तते। सुमित्राया औदार्यं अथाहगाम्भीर्यं, सारल्यञ्च अपरिमितमसाधारणञ्च दृश्यते। ज्ञायते यत् एकतः सपत्न्याः कोसल्यायाः पुत्रस्य रामस्य राज्याभिषेकसमारोहस्य पूर्वसमाचारान् श्रुत्वा पुत्रस्य भरतस्य राज्यप्राप्तिकृते कैकेय्याऽचरितेन कुटिल-कर्मणा निखिलं राजभवनं शोकाकुलमासीत्, अपरतः रामवनगमनसमाचारेण शोकाकुलायाः मातुः कोसल्यायाः करुणक्रन्दनेन सर्वत्र हाहाकारः अश्रूयत। ईदृशे विषये समयेऽपि लक्ष्मणस्य माता सुमित्रा धन्याऽऽसीत् या रामेण सह गन्तुमुद्यतस्य प्राणसमस्य पुत्रस्य लक्ष्मणस्य निश्चयं ज्ञात्वाऽपि धैर्यं नाजहत् अपितु पुत्रस्य मनोबलमवर्धयत्। धृतिमती सुमित्रा दृढ़संकल्पवतः पुत्रस्य लक्ष्मणस्य मस्तकमुपाघ्राय परिवारस्य राज्यस्य हिताय तं रामेण सह वन गमनायादिदेश तथा हि-

सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने।
रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति।।

वा.रा./अयो/40/5

लक्ष्मणमाता सुमित्रा परिवारस्य सदाचार-संहिताया पालिका अनुवर्तिका च दृश्यते। परिवारे ज्येष्ठकनिष्ठयोर्मध्ये समुचितव्यवहारस्य आदान-प्रदान विषये सुमित्रा सर्वथा सावहिता दृश्यते। भवतु उचितमनुचितं वा प्रियमप्रियं वा ज्येष्ठानुवर्तनं कनिष्ठानां कर्त्तव्यमस्ति। अस्मिन् विषये कीदृशोऽपि प्रमादः सुमित्रायै असह्य आसीत्। वाल्मीकि-रामायणे वनं प्रति प्रस्थितस्य पुत्रस्य कृतेऽपि मातुः सुमित्राया इदमेवानुशासनं दृश्यते-

तथाहि- व्यसनी वा समृद्धो वा गतिरेव तवानघ।
एवं लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत्।।

वा.रा./अया/40/6

वाल्मीकिरामायणे लक्ष्मणस्य माता सुमित्रा समता, सौम्यता निःस्पृहतादीनां गुणानां समवाय इव

**प्रतीयते। सपत्न्योः सुतैः सह सा समभावेन व्यवहरति। कदापि, कथमपि तेभ्यो नाऽसूयत अक्रुध्यत वा। अनसूयायाः प्रतिमूर्तिः सुमित्रा आत्मनः समभावेनैव वने सीतारामं प्रति समर्पण-भावेन व्यवहर्त्तुमादिष्टवती।**

**तथाहि-रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।**
**अयोध्यामटवीं विद्धि गच्छ तात यथा सुखम्।।**

**वा.रा. अयो/40/9**

**लक्ष्मणमातुः सुमित्राया दिव्यं चरित्रं गरिमामयं व्यक्तित्वं लोके पीयूषवर्षिणं संस्कृतिसञ्जीवकञ्च विद्यते। ईदृशीनां त्यागमूर्तीनां नारीणां पावनी कथा परिवारेषु श्रावणीया विद्यालयेषु पाठनीया। नूनं सुमित्रा गुणगौरवेण गुरुरस्ति।**

## हिन्दी अनुवाद

बालक के जीवन निर्माण में माता की भूमिका विशिष्ट होती है माता केवल बालक का लालन-पालन एवं उसे बाल्यावस्था में अक्षर ज्ञान से सम्पन्न बना कर ही अपने कर्त्तव्य से उर्ऋण नहीं होती है, अपितु बालक के व्यक्तित्व निर्माण में माता का दायित्व 'असिधाराव्रत' की भाँति दुर्वह एवं दुष्कर होता है। माता क्षमा-धैर्य-त्याग एवं श्रम आदि गुणों के आश्रय से बालक के व्यक्तित्व में सदाचार, सुविचार, सत्संस्कारादि गुणों का आधान करने के लिए मन, वचन एवं कर्म से समर्पित होती है। माता के सुशासन से रहित बालक उच्छृंखल एवं परिवार के लिए सिरदर्द बन जाता है। तथा सन्माता के निर्देशन में विकसित बालक शाणोल्लिखितमणि की भाँति आभा से युक्त होता है। निश्चय ही बालक के जीवन निर्माण में माता की भूमिका घट के निर्माण में कुम्भकार की भूमिका की भाँति अत्यन्त महत्त्वपूर्ण होती है। लोक में माता की भूमिका अनिर्वचनीय होती है, इस तथ्य को अनुभव करते हुए लोक में ''माता गुरुजनों की भी गुरु है'', ''माता के समान कोई गुरु नहीं है'' ''माता को देवता मानो'' ''माता अपने गुणों के कारण पिता से सौ गुना महान है'' तथा ''माँ और जन्मभूमि स्वर्ग से भी अधिक गौरवशालिनी हैं।'' माता को प्रशंसा परक इन वचनों से अभिनन्दित एवं प्रशंसित किया गया है। सन्माताओं की इस परम्परा में अयोध्या नरेश दशरथ की पत्नी, दशरथ के पुत्र लक्ष्मण की माता सुमित्रा अग्रगण्या है। लक्ष्मण की माता सुमित्रा सुख-दुःख लोभ-मोह, राग-विराग, पद-प्रतिष्ठा, मान-अपमान आदि द्वंन्द्वो से रहित परिवार की श्रेयस्कामिनी पुत्र का यश चाहने वाली सन्माता के रूप चित्रित की गई है। बाल्मीकि रामायण में लक्ष्मण की माता सुमित्रा का औदार्य और गाम्भीर्य अपरिमित एवं असाधारण प्रतीत होता है। एक ओर अपनी सौत कौसल्या के पुत्र राम के राज्याभिषेक के विषय में पूर्व समाचार को सुनकर अपने पुत्र 'भरत' की राज्यप्राप्ति के विषय में कैकेयी द्वारा आचरित कुटिल कर्म से सम्पूर्ण राजभवन अस्त-व्यस्त हो रहा था दूसरी ओर राम के वनगमन के विषय में समाचारों को जानकर राम की माता कोसल्या के क्रन्दन से सर्वत्र हाहाकार सुनाई दे रहा था। इस विषम समय में कोसल्या के पुत्र राम के साथ वन जाने को उद्यत अपने पुत्र लक्ष्मण को वन जाने से रोका नहीं अपितु पुत्र का मनोबल बढाया। धैर्यशील सुमित्रा ने दृढ़ संकल्प वाले पुत्र लक्ष्मण का मस्तक सूँघ कर उसे परिवार एवं राज्य के हित केलिए राम के साथ वन जाने की स्वीकृति प्रदान की। लक्ष्मण की माता सुमित्रा परिवार की आचार संहिता का पालन एवं अनुकरण करने वाली योग्य नारी के रूप में चित्रित की गई है। परिवार में छोटे-बड़े सदस्यों में व्यवहार के आदान-प्रदान के विषय में सुमित्र सर्वथा सुशिक्षित हैं। उचित अथवा अनुचित प्रिय अथवा अप्रिय प्रतीत हो तथापि अपने से बड़ों का

अनुवर्तन छोटों का कर्त्तव्य है वाल्मीकि रामायण में वन में प्रस्थान करने वाले पुत्र को भी सुमित्रा यही कहती है कि ज्येष्ठ व्यक्ति यदि आपत्ति ग्रस्त हो अथवा समृद्ध हो सज्जनों का कर्त्तव्य है कि उनकी आज्ञा पालन करें। वाल्मीकि रामायण में लक्ष्मण की माता सुमित्रा की शालीनता, सहिष्णुता एवं उदारता अनिर्वचनीय एवं अनुकरणीय हैं। अपनी दोनों सौतों के पुत्रों के साथ सुमित्रा समभाव एवं प्रेम से व्यवहार करती है। उसके साथ कभी भी ईर्ष्या एवं क्रोध प्रदर्शित नहीं करती है। साक्षाद् अनासूया की प्रतिमूर्ति सुमित्रा अपनी उदारता से ही प्राणप्रिय तथा राम के साथ वन जाने के लिए उद्यत पुत्र को वन में सीताराम के साथ समर्पण भाव से रहने के लिए आदेश देती है और कहती है हे पुत्र - तुम वन में राम को पिता दशरथ, सीता को माँ सुमित्रा एवं दुर्गम वन को अयोध्या समझ कर सुख से रहना। वाल्मीकि रामायण में वर्णित लक्ष्मण की माता सुमित्रा का दिव्य व्यक्तित्व एवं चरित्र भारतीय परिवारों के लिए पीयूषवर्षी एव संस्कृति संजीवक है। ऐसी त्यागमूर्ति नारियों का पावन-चरित्र परिवारों में सुनाने योग्य एवं पाठ्यक्रमों में पढ़ाने योग्य साथ ही युगयुगों तक लोक में अनुकरणीय है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

# कोविद-श्रीकलानाथशास्त्री जयतु

**❑ डॉ. नारायण काङ्करः**

जन्मदिवसोपलक्ष्ये, सुधी-श्रीशिवदत्त-चतुर्वेदि-रचितम्।
देवर्षि-वभैव-वन्द-नं वाचं वाचं मोमुद्येऽधाहम्।।1।।

एवं हि प्रतीतं यद्, यथा ममैव मानसमत्रोद्धाटितम्।
वच्मि साधु साधु श्री-शिवदत्त-चतुर्वेदि-सुबन्धुवरम्।।2।।

चिरञ्जीवतु स्वस्थः, श्रीचतुर्वेदी महानुभाव एषः।
वयसा कनीयांसमपि, विद्ययाऽग्रजं तमिममाशिषा युनज्मि।।3।।

संस्कृत-मनीषी बन्धु, रयमपि देवर्षि-कलानाथशास्त्री।
दीर्घायुः स्यात् स्वस्थो, यशोधनमुपार्जतु भूरि भूरि सततम्।।4।।

नैक भाषाऽभिवेत्ता, शास्त्रपयोनिधि-तल-स्पर्शि-पाण्डित्यः।
समीक्षक-चूडामणिः, कोविद-श्रीकलानाथशास्त्री जयतु।।5।।

यन्मुखाम्बुजे नित्यं, पर-श्लाघातिरिक्तं नान्यदत्र।
विराजते जातु किमपि, स श्रीकलानाथशास्त्री ह्यनुकार्यः।।6।।

वक्ता सुस्मिति-पूर्वक-, मथो लेखको निर्भयतया सह सदा।
सुलभो न सर्वत्र ना, श्रीकलानाथशास्त्रि-तुल्यो मनीषी।।7।।

वाण्यामस्य शारदा, विराजते सदा भगवती दयामयी।
एतद्-गद्य-पद्य-कृति-, समुच्चयोऽत्रास्ति प्रत्यक्षं प्रमाणम्।।8।।

एतत्-पद्येषु नूत्न-, नूत्न-कल्पनाः कस्य मनो नहि हरन्ति?
स्व-पैतृक-विद्या-वित्त, रक्षि-वर्धकः कलानाथोऽनुकार्यः।।9।।

अनेनापि निज-विद्या, रक्षी स्वकुटुम्बे किं कोऽपि प्रसूतः?
इति कस्य न जिज्ञास्यं, समाधेयमस्ति सम्प्रति केनचनापि।।10।।

संस्कृतज्ञाः किं नहि, स्व-कुटुम्बिनोऽत्र संस्कृतज्ञान् कुर्वते?
प्रश्नोऽयं तु साम्प्रतं, त्वरितमेवोत्तरं किमपेक्षते नैव?।।11।।

श्रीकलानाथ-शास्त्रिण, मुपेत्य येन तद्-विद्या-धनं नाप्तम्।
हन्त! किं स न वर्त्तते, मन्दभाग्यो निष्फल-जीवनश्च जनः।।12।।

मेघो वर्षति सततं, शुक्तिश्चेद् मुखं नोद्धाटयते क्वचित्।
मुक्ता तर्हि जायेत, कथं तत्रेति स्वयमेव विचार्यताम्।।13।।

तमिमं श्रीकलानाथ, शास्त्रिणं सारस्वत-सुबन्धु-प्रवर्यम्।
पुनरपि बहु बहु युनज्मि, सारोग्य-दीर्घायुराप्त्यै स्वाशीर्भिः।।14।।

अस्माद् बहु-बहु शिशिक्षु-, रस्मि परं शरीर-शैथिल्यमत्र मे।
नानुमन्यते तस्मात्, खेदमवर्ण्यं स्व-हृदि समनुबोभवीमि।।15।।

चिन्तन-भाषण-लेखन, कवनादौ या कलाऽस्ति कलानाथेऽत्र।
भवत्वसौ प्रतिसंस्कृत, विदुषीति नित्यं हृदा भृशं कामये।।16।।

ईदृश-वैदुष्यं तु, दुर्लभमेव सौभाग्येनैव सुलभम्।
पूर्व-जन्म-कृत-पुण्यै-, रेव लभ्यं भवति हि केनचिज्जनेन।।17।।

यत्रायं भाषते न, न श्रावयति कवितां स्वां मञ्जुलाम्।
सभां तां सार्थिकां नहि, केऽपि मन्यन्ते तत्रोपस्थिताः।।18।।

भारतीं भूषयतेऽय-, मथवेमं भूषयतेऽत्र भारती?।
निर्णेतुं प्रभवामि न, मन्दबुद्धिरहं तु काङ्करः।।19।।

**- युग्मम् -**

ऊनत्रिंशे केसर-, विहारे विद्या-वैभव-भवनेऽत्र।
जगत्पुराख्य-जयपुरे, वासी सर्व-कुशलाकाङ्क्षी।।20।।

इति विनिवेद्य साम्प्रतं, सद्यः समुद्भूत-स्वीय-हार्दम्।
नमन् विद्वद्-विधेयो, विरमति नारायणकाङ्करः।।21।।

राष्ट्रपतिसम्मनितमनीषी
29, केसर विहार, जगतपुरा, जयपुर

आयुर्वेद-स्तम्भः

# प्रावृषि दुर्बलानलदीपनं हितम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आयुर्वेद प्रवृष्टेः प्रथमः कालः ''प्रावृड्'' इति नाम्ना ख्यातः, कालो हि सः भिषग्भिः दोषोपचयप्रकोप-प्रशमनिमित्तः प्रकल्पितः। कालप्रभावात् ग्रीष्मे सञ्चीयते वायुः वर्षाकाले प्रकुप्यति, वर्षासु चीयते पित्तं शरत्कालै प्रकुप्यति, हेमन्ते निचितः श्लेष्मा वसन्ते प्रकुप्यति। अत एव वर्षासु वायोः विनाशकानां पित्तस्य च प्रशमनात्मकानां द्रव्याणां योगानाञ्च प्रयोगः करणीयः। वर्षासु चत्वारः मासाः निर्धारिताः। सामान्यतयाऽऽषाढश्रावणभाद्रपदाश्वयुजात्मकेष्वे-तेषु सर्वेष्वेव चतुर्षु मासेषु नैव वर्षन्ति पर्जन्याः, विशेषरूपेण तूत्तरभारते। पुनरपि दोषाणामुपचया-दीनुपलक्ष्यैव एव कालविभागः प्रकल्पितः।**

वर्षा होने का प्रथम (पहला, प्रारम्भिक) काल आयुर्वेद में ''प्रावृट्'' इस नाम से प्रसिद्ध है, निश्चय ही व काल चिकित्सकों के द्वारा दोषों के सञ्चय, प्रकोप और प्रशम केलिये प्रकल्पित किया गया है। कालप्रभाव से ग्रीष्म में वायु का सञ्चय होता है तथा वर्षाकाल में वह वायु प्रकुपित होता हे, वर्षा में पित्त का सञ्चय होता है तथा वह शरत्काल में प्रकुपित होता है। हेमन्त से संचित श्लेष्मा वसन्त में प्रकुपित होता है। इसलिये वर्षा में वायु के विनाशक तथा पित्त के प्रशमनात्मक द्रव्यों और योगों का प्रयोग करना चाहिये। वर्षा में चार मास निर्धारित हैं। सामान्यतया आषाढ, श्रवण, भाद्रपद एवं आसोज इन सभी चारों महीनों में ही बादल नहीं बरसते हैं, विशेषरूप से तो उत्तरभारत में। फिर भी दोषों के उपचयादि को ध्यान में रख कर ही यह कालविभाग प्रकल्पित है।

**वर्षास्वग्निमान्द्यं विशेषेण भवति, यतो ह्यादानस्यानन्तरं वर्षारम्भो भवति। तस्मिन् काले आदानदुर्बले देहे पक्ता दुर्बलो भवति। स पक्ता वर्षासु भूबाष्पान्मेघनिस्यन्दात् तथा जलस्याम्ल-पाकाद् पुनः बाधितो भवति। अस्मात्कारणादग्नि-संरक्षणवताऽवधानतया वर्षर्तुचर्यायाः परिपालनं करणीयम्। कालेऽस्मिन्नुदमन्थं, दिवास्वप्नम्, अवश्यायं, नदीजलसेवनं, व्यायामम्, आतपं तथा व्यवायं वर्जयेत्। पानभोजनसंस्कारेषु प्रायः क्षौद्रप्रयोगः करणीयः यदा कदा मधूदकस्य प्रयोगः मधुना विनिर्मितानाञ्चासवारिष्टानां प्रयोगः सुखावहो भवति।**

वर्षा में अग्निमान्द्य विशेष रूप से होता है, क्योंकि आदान के बाद में वर्षा प्रारम्भ होती है। उस समय आदानकाल के कारण दुर्बल देह मं जाठराग्नि भी दुर्बल होती है। वह जाठराग्नि वर्षा में भूबाष्प से, बादलों से सूक्ष्म रूप ये चू कर परिव्याप्त होने वाली नमी से तथा (कालप्रभाव से) जल का अम्ल पाक होने से पुनः बाधित होती है। इस कारण से अग्नि संरक्षण करने वाले व्यक्ति के द्वारा सावधानी से वर्षार्तुचर्या का परिपालन करना चाहिये। इस काल में उदमन्थ (अधिक पानी मिले सत्तू का घोल आदि), दिवास्वप्न, रात को गिरने वाली ओस, नदीजल का सेवन व्यायाम, आतप तथा व्यवाय वर्जित है। पेय द्रव्यों और भोजन के विभिन्न संस्कारों में प्रायः क्षौद्र (छोटी मक्खी के शहद) का प्रयोग करना चाहिये। यदा कदा मधूदक (शहद मिले हुये पानी) का प्रयोग एवं मधु से विनिर्मित आसव तथा अरिष्टों का प्रयोग सुख देने वाला होता है।

**ग्रीष्मे कालप्रभावात् वातदोषस्य सञ्चयो भवति, प्रकोपस्त्वस्य वर्षर्तुकालप्रभावात् वर्षासु भवति।**

**अत एव कालप्रभावाद्वातप्रकोपकहेतूनाञ्च सेवनाद्ये रोगग्रस्ताः भवन्ति तैरग्निसंरक्षणेन सहैव वातदोष-प्रशमनात्मकानामौषधयोगानां प्रयोगश्चिकित्सकस्य परामर्शपूर्वकः करणीयः। पथ्यपरिपालनन्तु करणीयमेव। ये च स्वस्थाः सन्ति तैस्तु प्रत्यवाय-हेतुपरिहारकाणां सञ्चितदोषप्रशमकानां ऋतुजनित-रोगप्रतिरोधकक्षमतोत्पादकानां च निरापदात्मकाणां योगानां प्रयोगः करणीयः। अत्रैतादृशानां केषाञ्चिद् योगानामुल्लेखः क्रियते-**

ग्रीष्म में काल के प्रभाव से वात दोष का सञ्चय होता है, इस का प्रकोप तो वर्षा ऋतु के काल के प्रभाव से वर्षा में होता है। अतः एव काल के प्रभाव से तथा वातप्रकोपक हेतुओं के सेवन से जो लोग रोग ग्रस्त होते हैं, उन के द्वारा अग्नि संरक्षण के साथ ही वातदोष का प्रशमन करने वाले औषधयोगों का प्रयोग चिकित्सक के परामर्शपूर्वक करना चाहिये। पथ्यपरिपालन तो करना ही चाहिये। और जो स्वस्थ हैं उन्हें तो प्रत्यवायहेतुपरिहारक (विघ्नकारक हेतुओं को दूर करने वाले), सञ्चितदोष का प्रशमन करने वाले तथा ऋतुजनित रोग प्रतिरोधक क्षमता को उत्पन्न करने वाले निरापादात्मक योगों का प्रयोग करना चाहिये। यहाँ ऐसे कुछ योगों का उल्लेख किया जा रहा है-

**1. पटोल-नागर-धान्यविनिर्मितस्य क्वाथस्य प्राथमिकः प्रयोगः कण्डू-पामा-शूलाग्निमान्द्याम्ल-पित्तादीनां प्रशमको भवति। त्रयाणामेतेषां द्रव्याणां परिमाणन्तु सम्मिलितरूपेण षट्ग्रामपरिमितमेव पर्याप्तम्। एभिः विनिर्मिते स्वाङ्गशीते क्वाथे दशग्रामपरिमितस्य क्षौद्रस्य प्रक्षेपणं कृत्वाऽस्य पानं प्रतिदिनमेव प्रातः सायं करणीयम्। ये स्वस्थाः सन्ति तैस्त्वस्य प्रयोगः सप्तदिनपर्यन्तमेव करणीयः। ये तु कण्ड्वादिभिः ग्रस्ताः भवन्ति। तैरस्य प्रयोगस्य निरन्तरं सेवनं करणीयम्।**

परवल के पत्ते-सोंठ-धनिया इन से विनिर्मित क्वाथ का प्राथमिक प्रयोग कण्डू-पामा-शूल-अग्निमान्द्य-अम्लपित्त इत्यादि का प्रशमन करने वाला होता है। इन तीनों द्रव्यों का परिमाण जो सम्मिलित रूप से छः ग्राम ही पर्याप्त है। इनसे विनिर्मित स्वाङ्गशीत क्वाथ में दशग्राम परिमाण के क्षौद्र (शहद) का प्रक्षेपण करके इसे प्रतिदिन ही प्रातः सायं करना चाहिये। जो लोग स्वस्थ हैं उन के द्वारा तो इस का प्रयोग सात दिन पर्यन्त ही करना चाहिये। जो लोग कण्डू आदि से ग्रस्त होते हैं उन्हें तो इस योग का निरन्तर सेवन करना चाहिये।

**2. वर्षासु पटोलपत्र-विश्वभेषज-अमृता-कटुरोहिणीत्येतानां चतुर्णां द्रव्याणां सम्मिलित-रूपेण दशग्रामात्रायां गृहीतानां विधिना क्वाथनिर्माणं कृत्वा प्रतिदिनं कालद्वयं पानेन शूल-अग्निमान्द्य-अम्लपित्त-भ्रम-अरुचि-अम्लपित्त-दाह-ज्वर-छर्दीत्यादीनां वर्षाजनितानां रोगाणां प्रशमनं भवति।**

वर्षा में पटोलपत्र-सोंठ-अमृता-कुटकी इन चार द्रव्यों का सम्मिलितरूप से दशग्राम मात्रा में गृहीत किये हुओं का विधि से क्वाथ का निर्माण कर के प्रतिदिन दो बार पीने से शूल-अग्निमान्द्य-अम्लपित्त-भ्रम-अरुचि-अम्लपित्त-दाह-ज्वर-छर्दि इत्यादि वर्षाजनित रोगों का प्रशमन होता है।

**वर्षास्वग्निमान्द्यं भवति तस्य निवारणार्थं कल्कधारणं गण्डूषकर्म वा करणीयम्। यदा हि वर्षासु जनोऽतिसारेण ज्वरेण वा पीडितो भवति तदाग्निमान्द्यं मुखवैरस्यमपि कदाचिद्भवति, तदा कल्कधारणेन गण्डूषकर्मणा वा तयोः निवारणं भवति। अत्र द्वयोः कल्कयोरुल्लेखः क्रियते-**

**1. मातुलङ्गस्य केशरं मधुसैन्धवसंयुतम्, कृत्वाऽस्य कल्कं मुखे धारयेत्।**

**2. अथवा शर्करादाडिमाभ्यां संयुक्तं द्राक्षाखर्जूरयोः कल्कं मुखे धारयेत्।**

**अग्निमान्द्यनिवारणार्थं वातप्रकोपापवाणार्थं तु प्रातः प्रातः ससर्पिष्कं रसोनमुपयोजयेत्। किन्त्वस्य प्रयोगः निरन्तरमधिकदिनपर्यन्तं न करणीयः।**

वर्षा में अग्निमान्द्य होता है, उस के निवारण के लिये मुख में कल्कधारण या गण्डूषकर्म (मुख में द्रव भर कर रखने की विधि) करना चाहिये। जब वर्षा में व्यक्ति अतिसार से या ज्वर से पीडित होता है तब अग्निमान्द्य और मुखवैरस्य भी कभी-कभी हो जाता है, तब कल्कधारण करने से या गण्डूषकर्म करने से उन दोनों का निवारण होता है। यहाँ दो कल्कों का उल्लेख किया जा रहा है -

1. बिजौरा निम्बु की केशर को शहद और सैन्धवनमक से युक्त कर के इस के कल्क को मुख में धारण करना चाहिये।

2. अथवा शर्कराऔर दाडिम से संयुक्त द्राक्षा और खर्जूर के कल्क को मुख में धारण करना चाहिये।

अग्निमान्द्य के निवारण के लिये और वातप्रकोप को दूर करने के लिये तो प्रातः प्रातः घी के साथ रसोन का प्रयोग करना चाहिये। किन्तु इस का प्रयोग निरन्तर अधिकदिनपर्यन्त नहीं करना चाहिये।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# संस्कृत समाचाराः

विश्वगुरुदीपआश्रम शोध संस्थानेन दिनांक 12 तः 14 जून 2019 पर्यन्तम्, अभिलेखीयं परिरक्षणं संरक्षणं इति विषये त्रिदिवसीय-कार्यशाला समायोजिता। इयं कार्यशाला राजस्थानसर्वकारीय अभिलेखागारेण स्वीकृता अनुमोदिता चासीत्। अस्यां कार्यशालायां श्रीमान् रमाशंकर गौडः सोमबाबू शर्मा च प्रशिक्षकौ आस्ताम्। प्रशिक्षणे, पाण्डुलिपि-दुर्लभग्रन्थ-पुरातन शासनपत्र सेवाभिलेख ऐतिहासिक अभिलेखानां परिरक्षणसंरक्षणयोः सम्यक् परिज्ञानं प्रादीयत। कार्यशालायाः समापन समारोहावसरे विश्वगुरूदीप-आश्रम शोध संस्थानस्य अध्यक्ष महोदयैः कार्यशालायाः संयोजकानां सहसंयोजकानां सहभागिनां च धन्यवादः विज्ञापितः।

सप्तदश्या लोकसभाया अधिवेशनं जूनमासस्य सप्तदशे दिनाङ्के प्रारब्धम्। अस्मिन् लोकसभाया सदस्यैः सदस्यतायाः शपथग्रहणं कृतम्। संविधाने स्वीकृतासु (अष्टम्याम् अनुसूच्याम्) भाषासु सदस्यैः शपथो गृहीतः। 43 त्रिचत्वारिंशत् सदस्यैः संस्कृतभाषया शपथग्रहणं कृतं येषु हर्षवर्धन-प्रतापचन्द्र षडङ्गी-प्रभृतिमन्त्रि-महोदया अप्यासन्। षडङ्गिना स्वभाषणेऽपि संस्कृतं प्रयुक्तम्।



# श्रद्धाञ्जलिः

भारतमाता मन्दिरस्य संस्थापकानां महामण्डलेश्वर स्वामिश्रीसत्यमित्रानन्दगिरिपादानां 25 जून दिनाङ्के भौमवासरे ब्रह्मलोकप्रयाणेन विषण्यास्तेभ्यो विनीतं श्रद्धाञ्जलिमर्पयामः। ते 87 वर्षवयस्का आसन्।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20


हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in



स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः


प्रतिष्ठायाम्,